.. Shankarasmritih or laghudharmaprakashika ..
॥ शाङ्करस्मृतिः अथवा लघुधर्मप्रकाशिका ॥

ॐ
As the legend goes, Kerala was a gift of Arabian sea to Parasurama (parashurAma). Parasurama threw his axe across the sea from Gokarnam to Kanyakumari and water receded up to the spot where it fell. Parasurama brought Brahmins to this land and he gave the land to them. They (Namboothiris, Kerala Brahmins) were the original rulers of Kerala. Parasurama (also called Bhargavah) decided the life style of Keralites in Bhargava Smriti. This Smriti being considerably large was abridged by Adi Shankara and that is called Sankarasmriti also termed as laghudharmaprakasika. That was in two volumes originally. However, only the first volume, Purva Bhagah is available now that is presented here. Bhargavasmriti is also not available.

पूर्वभागः

नत्वा धर्मविदो देवानृषींश्च परमं महः ।
साम्बं शिवमनुस्मृत्य शङ्करेण यतात्मना ॥ १.१.१॥
आलोक्य भार्गवात् प्राप्तं धर्मशास्त्रमितस्ततः ।
विस्तरेण विषीदत्सु कृपया मन्दबुद्धिषु ॥ १.१.२॥
प्रायस्तदेव सङ्क्षिप्य क्रियते मृदुभिः पदैः ।
अल्पाक्षरैरनल्पार्थैः पृथगेतन्निबन्धना ॥ १.१.३॥
वर्णानामाश्रमाणाञ्च धर्मे दीप इवापरः ।
अनवद्यं सतां नाम्ना लघुधर्मप्रकाशिका ॥ १.१.४॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति स्वयम्भुवः ।
चत्वारो मुखबाहूरुपत्भ्यो वर्णाः पुराभवन् ॥ १.१.५॥
अतस्ते प्राकृता नाम प्रकृतिः कारणं यतः ।
वैकृता अपि वक्ष्यन्ते सङ्कीर्णा नाम सङ्करात् ॥ १.१.६॥
सर्वे ते निकृता धर्मे स धर्मो यत्र वैदिकी ।
प्रवर्तना स्यात् क्षेमाय सोप्रतिद्वन्द्वितां गतः ॥ १.१.७॥
अधर्मोस्य प्रतिद्वन्द्वी यस्माच्छ्रौतनिवर्तनं ।
धर्माधर्माविति ज्ञात्वा धर्मवान् भवति ध्रुवं ॥ १.१.८॥
आश्रमो ब्रह्मचर्यादिर्येन तु ब्रह्मचारिणः ।
गृहस्थाश्च वनस्थाश्च भिक्षवश्चेत्यसौ भिदा ॥ १.१.९॥

पृथग्वेषाः पृथग्द्धर्माः पृथगन्नाश्च ते स्मृताः ।
वर्णसाधारणान् धर्मानत ऊर्द्ध्वं निबोधत ॥ १.१.१० ॥
अविशेषेण चोद्यन्ते मनुष्या यत्र यत्र सः ।
साधारणत्वाद्वर्णानां धर्मस्साधारणो मतः ॥ १.१.११ ॥
क्षमा सत्यं तपः शौचमहिंसा स्तेयवर्जनं ।
अपारुष्यमपैशुन्यमलोभित्वमदम्भता ॥ १.१.१२ ॥
अनभिध्यानहङ्कारःस्थम्यमाद्रान्तरङ्गता ।
विभवे सति दानञ्चेतायेवं तस्य तु सङ्ग्रहः ॥ १.१.१३ ॥
यथा हि परमो धर्मो देवानां दम उच्यते ।
यथा दयासुराणाञ्च तथा दानं नृणामिह ॥ १.१.१४ ॥
अद्धयूषुर्ब्रह्मचर्येण देवासुरनरास्तपः ।
सृष्टमात्रा विधातारं प्रष्टुकामाः पुरा किल ॥ १.१.१५ ॥
प्रादुर्भूतस्स तैः पृष्टः किन्नः कृत्यमिति क्षणं ।
ध्यात्वा तानात्मजानाह स्पर्शेष्टादशमक्षरं ॥ १.१.१६ ॥
त्रिवारमथ यूयं मे समाना हि स्थ पुत्रकाः ।
समानमुपदिष्टं तदिदमित्यवदच्च तान् ॥ १.१.१७ ॥
दम्यतामिति तद्देवा दयद्धवमिति दानवाः ।
दीयतामिति मर्त्याश्च व्याचक्षतयथारुचि ॥ १.१.१८ ॥
अथ तानाह हे देवा दमो धर्म्मोस्तु वः परः ।
हे सुरा वो दया दानं हे मर्त्या व इति प्रभुः ॥ १.१.१९ ॥
तस्माद्दानं मनुष्याणां सर्वेषां धर्म उत्तमः ।
यथाशक्त्यनुतिष्टंस्तच्छोकांस्तरति दुस्तरान् ॥ १.१.२० ॥
प्रेत्य लोकानवाप्नोति रत्नपुष्टिमनोहरान् ।
दुर्ल्लभान्मर्त्यलोकेषु कामानपि च विन्दते ॥ १.१.२१ ॥
ब्रह्मक्षत्रविशां धर्मस्तपो वेदानुपालनं ।
साधारणः सहातित्थ्यवैश्वदेवाग्निहोत्रकं ॥ १.१.२२ ॥
समन्त्र संस्क्रियाद्यो स्यादपि चान्यत्र दृश्यते ।
रामक्षेत्रे तु नास्त्यन्ये भागिनेया हि दायिनः ॥ १.१.२३ ॥
अब्राह्मणानां प्रायेण तस्माद्धर्मो विभिद्यते ।
वक्ष्यन्ते चोपरिष्टात् स सर्वश्चेह खलु क्वचित् ॥ १.१.२४ ॥
सरहस्यं धनुर्वेदग्रहणं विप्रभूभुजोः ।
स्मृतस्साधारणो धर्मो गोपथाध्यायनं तथा ॥ १.१.२५ ॥
ब्राह्मणोरुजयोः पाठो भूसूक्तस्योभयोस्समः ।
गोष्ठशय्याव्रतं तद्वत् कुसीदेन च वर्तनं ॥ १.१.२६ ॥
वासनीवारकप्रेष्यवाक्यस्योच्चारणं मिथः ।
पौर्वापर्येण तुल्योयं धर्मो भूदेवशूद्रयोः ॥ १.१.२७ ॥

बाहुजोरुजवर्णानां भूदेवेपि कनीयसि ।
आगते सदृशो धर्मः प्रत्युत्थानाभिवादने ॥१.१.२८॥
रामक्षेत्रे तु शूद्रस्य नाभिवाद इति स्थितिः ।
स तल्स्थानेञ्जलिं कुर्यादिति भार्गवशासनं ॥१.१.२९॥
बाहुजोरुजयोर्द्धर्मस्त्रिकर्मपरिनिष्ठितिः ।
अन्यत्र भार्गवक्षेत्रात् साधारण इति स्मृतः ॥१.१.३०॥
बाहुजाङ्घ्रिजयोर्द्धर्मस्त्यागो वैक्लब्यतो विना ।
प्राणानां ब्राह्मणस्यार्थे साधारण उदाहृतः ॥१.१.३१॥
ऊरुजाङ्घ्रिजयोर्द्दूर्वालवनं क्षितिवर्द्धनं ।
प्राणत्यागो गवार्थे च धर्मस्साधारणस्त्रिकं ॥१.१.३२॥
मुखजोरुजवर्णानां सहनं बाहुजागसां ।
साधारणं विदुर्द्धर्मं दीर्घवैरानवस्थया ॥१.१.३३॥
इति साधारणाः केचिद्वर्णधर्मा निरूपिताः ।
शेषान्निरूपयिष्यामस्तत्र यत्र यथान्तरं ॥१.१.३४॥
इति प्रथमस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
अधीत्यध्यापने दानादाने यजनयाजने ।
त्रीणि द्विकानि विप्रेषु नियतानि स्वयम्भुवा ॥१.२.१॥
क्षत्रेष्वद्ध्ययनं दानं यजनञ्च प्रजापतिः ।
सप्रजापालनं त्रीणि धर्माणि निदधौ पुरा ॥१.२.२॥
गोरक्षया च वैश्येषु तानि त्रीणीति चिक्षिपे ।
शूद्रेषु द्विजशुश्रूषां दानं शक्तौ मुदन्वितं ॥१.२.३॥
द्वौ धर्मौ प्रथमं धात्रा नियतौ सम्प्रचक्षते ।
ऋतामृताभ्यां भूदेवो जीवेदथ सत्यानृतेन वा ॥१.२.४॥
प्रमृतेनाथवा जीवेदथ सत्यानृतेन वा ।
ऋतमुञ्छं सिलञ्चाहुरमृतं यदयाचितं ॥१.२.५॥
याच्छाचर्यं मृतं तत्र प्रमृतं कर्षणं मतं ।
सत्यानृतन्तु वाणिज्यं तेषामुञ्छसिलं महत् ॥१.२.६॥
अमृतञ्च ऋमादन्यद्द्वयं निन्द्यं प्रचक्षते ।
जन्मिनो यदि भूदेवा जन्मोपग्रहणात् क्वचित् ॥१.२.७॥
आगतेन च जीवेयुर्जन्मभोगेन कर्षकात् ।
सर्वे जन्मिन एतेन व्याख्याता इति भार्गवः ॥१.२.८॥
स्वक्षेत्रे सङ्ग्रहं चक्रे विष्णुर्द्धर्मपतिर्भृगुः ।
लज्जते भर्त्स्यते तेन विप्रः कामी शमोचितः ॥१.२.९॥
प्रशमप्रतिपन्नैरित्युच्यते भूप्रतिग्रहात् ।
जल्मेति वर्णव्यत्यासात्तत्सम्बन्धेन सा च भूः ॥१.२.१०॥

जन्मेत्याख्यायते तस्य स्वामित्वञ्च तदाश्रयं ।
अग्निगुर्वतिथिप्रेष्ठभिक्षुशिष्टेन भूसुराः ॥१.२.११॥
जीवित्वा जन्मभोगेन न सीदेयुः क्वचिद्ध्रुवं ।
तण्डुलान्मुष्टिभिः षल्भिः पचेज्ज्येष्ठोगृहीगृहे ॥१.२.१२॥
अग्निगुर्वतिथिप्रेष्ठभिक्षुभ्यो मुष्टिपञ्चकं ।
विभज्यैकेन बिभृयादात्मानं गृहिणं सुतान् ॥१.२.१३॥
दासान्दासींश्च गोवत्सान् भ्रातृन् भ्रातृप्रियानपि ।
इति जन्मवतां वृत्तिर्भार्गवेण निरूपिता ॥१.२.१४॥
एवंवर्तन आप्नोति स शर्मेह परत्र च ।
क्षत्रियो बलिना जीवेद्रक्षन्नवहितः प्रजाः ॥१.२.१५॥
आरण्यकैश्च राज्यस्थैरथवा विक्रमेण च ।
गोभिः कृष्या च वर्तेत वाणिज्येनाथवोरुजः ॥१.२.१६॥
शूद्रो दास्येन सर्वेषां शिल्पैर्वा सकलैरपि ।
जन्मिदेयावशिष्टेन वृषलो हलकर्षणः ॥१.२.१७॥
नेतरो भार्गवक्षेत्रे कृष्या जीवेदनापदि ।
जघन्यो नोत्तमां वृत्तिमातिष्ठेदिह कश्चन ॥१.२.१८॥
आपद्यपि तु सेवेत श्रेष्ठो वृत्तिमनन्तरां ।
विप्रो वेदान्यथाधीते तथैवाध्यापयेच्च तान् ॥१.२.१९॥
अध्यापनान्न लिप्सेत वृत्तिमापल्गतोपि सन् ।
बहुन्न प्रतिगृह्णीयात् काम्यमापदि तु क्वचित् ॥१.२.२०॥
नात्यापद्यपि कुर्वीत निषिद्धस्य प्रतिग्रहं ।
सुस्वाध्यायरतो नित्यमकुर्वन् वेदविक्रयं ॥१.२.२१॥
निषिद्धन्न च गृह्णानो विप्रो ज्वलति वह्निवत् ।
कुर्वन् क्षत्रः क्षतत्राणं नात्यतीक्ष्णो न वा मृदुः ॥१.२.२२॥
कर्म्मसाक्षी नृणां शश्वद्धर्म्मे संस्थापयेत् प्रजाः ।
एवं व्रतः सदा राजा गोब्राह्मणहिते रतः ॥१.२.२३॥
शरणागतमत्यक्त्वा लोकेषु न विगीयते ।
कीर्तिञ्च सम्यगाप्नोति सर्वान् कामांश्च विन्दते ॥१.२.२४॥
प्रेत्य दिव्यानवाप्नोति लोकान् शोकविवर्जितान् ।
द्वावप्यन्यौ यथाशास्त्रं स्वधर्मपरिनिष्ठया ॥१.२.२५॥
दुस्तरांस्तरतः शोकान् लोकयोरुभयोरपि ।
उच्छृङ्खलस्य मर्त्यस्य धर्मशास्त्रव्यतिक्रमात् ॥१.२.२६॥
निरयेषु भवेद्वासो दुर्यशश्चातिदुस्सहं ।
तस्माद्धर्म्मान् समन्विच्छेत् क्षेमार्थी सततं जनः ॥१.२.२७॥
धर्म एव महान् बन्धुः संसारेत्रातिदारुणे ।
प्रतिवर्णं स सङ्क्षेपान्नियतः कथितो मया ॥१.२.२८॥

विस्तरेणोपरिष्टाच्च वक्ष्यते प्रायशः खिलं
इति प्रथमस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
ब्राह्मणः क्षत्रियो वैश्य इति तत्र द्विजातयः ।
त्रयो ज्ञेया यदेतेषां द्वे जाती जन्मनी विदुः ॥१.३.१॥
उभयोर्जन्मनोरेकं लौकिकं यन्नृणां मतं ।
अन्यत्तूपनयं प्राहुरिति तेमी द्विजा इति ॥१.३.२॥
संस्कारैः कर्णवेधान्तैस्समन्त्रैर्विधिवत् कृतैः ।
एनसो द्विविधात् पुत्रमुद्धृत्योपनयेद्विजः ॥१.३.३॥
पितान्य एवाचार्यो वा विद्याभिजनसम्मतः ।
समाहितमनाः काले स्व स्व गृह्योक्तवर्त्मना ॥१.३.४॥
गर्भाष्टमादिष्वब्देषु सुमुहूर्ते मुखोत्भवं ।
ब्रह्मवर्चसकामश्चेत्तमब्दे गर्भषष्ठके ॥१.३.५॥
गर्भादिकादशाद्येषु वत्सरेषु विशां पतिं ।
यदि विक्रमकामस्तं वत्सरे गर्भसप्तमे ॥१.३.६॥
गर्भतो द्वादशाद्येषु वत्सरेषूरुसम्भवं ।
नवमे यदि पण्यार्थी तानाहुर्ब्रह्मचारिणः ॥१.३.७॥
आषोडशान्न सावित्री ब्राह्मणानतिवर्तते ।
आद्वाविंशान्नृपानब्दादाचतुर्विंशकाद्विशः ॥१.३.८॥
अकृतोपनयास्सर्वे तत्राप्येते तदुत्तरं ।
सावित्रीपतितास्सत्भिर्गदिताश्च बहिष्कृताः ॥१.३.९॥
व्रात्या नाम स्युरकृते व्रात्यस्तोमे यथाविधि ।
इत्यर्थमृषयः प्राहुरितोन्यत्र स चेष्यते ॥१.३.१०॥
इयान् विशेष आख्यातो भार्गवेणात्र षोडशात् ।
ऊर्द्ध्वं न सूत्रलाभोस्ति सूत्रिणां ते पतन्ति च ॥१.३.११॥
व्रात्यस्तोमविधानेन सावित्र्याः प्रत्युपागमां ।
नाशास्त इत्यनाचारो रामक्षेत्र इति स्थितिः ॥१.३.१२॥
न जटां भार्गवक्षेत्रे बिभृयात् संस्कृतो वटुः ।
स्यादन्यत्र तु मुण्डो वा जटिलो वा शिखाधरः ॥१.३.१३॥
केशप्रारम्भतः फालादूर्द्ध्वं तु चतुरङ्गुलं ।
त्यक्त्वा दैवीं शिखामाहुश्चतुरङ्गुलविस्तृतिं ॥१.३.१४॥
तावतीमेव पैशाचीमासुरीञ्च ततः क्रमात् ।
मानुष्ये द्वे ललाटस्य प्रान्तयोरुभयोः कृते ॥१.३.१५॥
दक्षिणेषु शिखा दैवी केरलेषु न चेतराः ।
उत्तरेषु तु पैशाची नेतरा इति भार्गवः ॥१.३.१६॥
अविधानात् परित्यज्य सम्प्रदायागतां शिखां ।

वहन्नप्यतथाभूतां द्विजः पातित्यमृच्छति ॥ १.३.१७ ॥
विप्रः परिदधीतैषां चर्म्म कार्ष्णमपव्रणं ।
रौरवं क्षत्रियो बास्तं वैश्यो वासांसि वा त्रयः ॥ १.३.१८ ॥
वासस्तु विप्रः काषायं माञ्जिष्ठमवनीपतिः ।
हारिद्रमूरुजो नैतदिष्यते रामभूमिषु ॥ १.३.१९ ॥
कटिसूत्रञ्च कौपीनमुपवीतञ्च सर्वदा ।
धारयेयुस्त्रयोप्येते मेखलां कृष्णचर्म्म च ॥ १.३.२० ॥
कार्पासतन्तुभिः क्लिप्तं कटिसूत्रमरञ्जितं ।
एकग्रन्थि द्विजातीनां चतुष्पाशं प्रशस्यते ॥ १.३.२१ ॥
कौपीनञ्च तथातन्तु सर्वतःपुच्छमिष्यते ।
अतिर्यग्दीर्घवत् पृष्ठनिविष्टं ब्रह्मचारिणां ॥ १.३.२२ ॥
उपवीतन्तु रक्तं वा काषायादि यथाक्रमं ।
अथवा धवलं तेषां कृतं कार्पासतन्तुभिः ॥ १.३.२३ ॥
काषायं शस्यते तत्तु विप्रस्य प्रशमार्थिनः ।
राज्ञस्तुत्साहकामस्य शस्तं माञ्जिष्ठमेव तत् ॥ १.३.२४ ॥
हारिद्रमेव तच्छस्तं वैश्यस्य तु गवार्थिनः ।
यथाचारञ्च सर्वेषां सर्वतो नाभिसम्मितं ॥ १.३.२५ ॥
उपवीतमकार्पासकृतं कस्यापि नेष्यते ।
ऋषिणा भार्गवेणात्र निषिद्धमिति हेतुना ॥ १.३.२६ ॥
भागिनेयनिमित्तेन विप्रादन्यत्र वस्तुतः ।
धर्मभेदस्य सत्त्वेपि विप्रसाम्यं तु सूत्रिणां ॥ १.३.२७ ॥
यथा पालाश एवात्र सर्वेषां ब्रह्मचारिणां ।
दण्डस्तथोपवीतञ्च कार्पासमिति भार्गवः ॥ १.३.२८ ॥
सम्प्रदायागतं दण्डमन्यूनानतिरेकिणं ।
स्वस्वप्रमाणात् गृह्णीयुस्सर्वेपि ब्रह्मचारिणः ॥ १.३.२९ ॥
केशसम्मितमत्रापि पालाशं विप्र उद्वहेत् ।
नातिदीर्घस्तोन्येषां नातिह्रस्वश्च शस्यते ॥ १.३.३० ॥
न चैते बिभुयुर्द्दण्डमग्निदग्द्धं क्षतत्वचं ।
निस्त्वचं वा भृशस्थीलमन्तःकीटममस्तकं ॥ १.३.३१ ॥
अनेकाग्रञ्च वक्रञ्च तथास्पृश्यजनाहृतं ।
रिक्तापर्वाष्टमीछिन्नं स्पृष्टञ्चामेध्यवस्तुभिः ॥ १.३.३२ ॥
धारयेत् स्वर्णरुद्राक्षे सूत्रेणैकेन कर्म्मसु ।
सर्वेषु कण्ठे विप्रोत्र नातोन्य इति भार्गवः ॥ १.३.३३ ॥
स्नात्वा सूर्यमुपस्थाय हव्यवाहं परीत्य च ।
आहृत्य भैक्षमश्नियादाचार्यस्याभ्यनुज्ञया ॥ १.३.३४ ॥
इति प्रथमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
द्विजत्वमित्थं सम्प्राप्य सर्वे तेन्यत्र धर्मतः ।
श्रुतिस्मृतिपुराणानां जायन्तेध्ययनक्षमाः ॥१.४.१॥
अत्रोपनीतो भूदेव एकोध्ययनमर्हति ।
वेदबाह्यास्ततोन्ये तु विप्रो गुरुकुलेवसेत् ॥१.४.२॥
पुण्येह्नि गुरुणादिष्टः समन्त्राहुतिपूर्वकं ।
स्मृत्वा प्रणवगायत्र्यावधीतिं प्रारभते च ॥१.४.३॥
शौचाचारावबोधार्थं धर्मशास्त्रन्तु वेदतः ।
प्रागेव चोपदेष्टव्यं गुरुणा ब्रह्मचारिणे ॥१.४.४॥
अद्ध्येतव्यञ्च तेनैतदवश्यं पुनरन्यथा ।
शौचाचारपरिभ्रष्टो भवेद्धर्म्मपराङ्मुखः ॥१.४.५॥
गुरोरधीत्यधर्म्मार्थं शास्त्रं सर्वमतन्द्रितः ।
तत्रदृष्टानि कर्म्माणि कालानुगुणमाचरेत् ॥१.४.६॥
कर्म्मभ्यः प्रतिषिद्धेभ्यो निवर्तेत च सर्वदा ।
उषित्वैवमधीयानो ज्वलत्याम्नायमग्निवत् ॥१.४.७॥
आचार्या स्थविराश्चाभिवाद्यास्तेन यथाविधि ।
नान्याभिवादनं कुर्यादाचार्यस्याज्ञया विना ॥१.४.८॥
यथाकालं गुरोः पादौ गृह्णीयादप्रचोदितः ।
व्यत्यस्तहस्तः सव्येन सव्यमन्येन चान्यकं ॥१.४.९॥
अभिवाद्य गुरोः पादावद्ध्येतव्यं तदाज्ञया ।
विरमेच्च तथा कुर्याद्विरतश्चाभिवन्दनं ॥१.४.१०॥
येन येन स सन्तुष्येत्तत्तत् कर्म्म समाचरेत् ।
नाकार्यमिति मन्येत किञ्चित् कर्म्म यदि प्रियं ॥१.४.११॥
अनिष्टेभ्यो निवर्तेत सुतरां चावधानतः ।
प्रत्यक्षञ्च परोक्षञ्च तुल्यां बहुमतिं वहेत् ॥१.४.१२॥
एकाक्षरस्य दातारमपि निन्दन्ति ये गुरुं ।
न तेषां सम्प्रतिष्ठास्ति कुम्भीपाकं व्रजन्ति च ॥१.४.१३॥
अवक्षिप्तोपि विब्रूयान्न गच्छेत् प्रहृतोपि सन् ।
अध्यापनार्थे तत्र स्वान् प्राणानपि समर्पयेत् ॥१.४.१४॥
उत्तिष्ठेत् गुरुमालोक्य प्रविशन्तमभिव्रजेत् ।
अन्तिके तमुपस्थाय पुरस्कुर्वन् प्रवेशयेत् ॥१.४.१५॥
अभ्युपेत्य च तिष्ठन्तं भाषेत विनयान्वितः ।
तमुपस्थित आसीनं व्यजनेनोपवीजयेत् ॥१.४.१६॥
शयानं प्रणतो गच्छन् गच्छन्तमनु पृष्ठतः ।
धावन् धावन्तमासाद्य प्राङ्मुखश्च पराङ्मुखं ॥१.४.१७॥
अभिक्रुध्यन्तमाराद्ध्य प्रार्थनाभिःप्रसादयेत् ।

वदेत् स्वेनैव वक्तव्यं शनकैर्वच आशु वा ॥१.४.१८॥
दूरादायान्तमालोक्य प्रत्युत्तिष्ठेत् सदागुरुं ।
अविधानेन तस्याग्रे नासीत च बृहद् व्रतः ॥१.४.१९॥
न तस्य केवलं नाम ब्रूयात्तं गमनादिभिः ।
चेष्टाभिथवा वाचा नानुकुर्यात् कदाचन ॥१.४.२०॥
यत्रेतरस्मान्निन्दास्य परिवादोपि वा भवेत् ।
न तत्र तिष्ठेदेकत्र वर्जयेच्च सहासनं ॥१.४.२१॥
अन्यत्र नावोन्यत्राश्मफलकाच्छकटादपि ।
आसने नीच आसीनः स्वासीनस्याज्ञया गुरोः ॥१.४.२२॥
अधश्शायी सदैव स्यात् प्राङ्निद्रां नभजेत् ।
उत्तिष्ठेत् पूर्वमेवास्मादप्रमत्तः स्मरन् विधिं ॥१.४.२३॥
गुरुवद् वृत्तिमादिष्ठेदासेदुषि गुरोर्गुरौ ।
तथैव गुरुपुत्रे च प्रायो वृत्तिं समाश्रयेत् ॥१.४.२४॥
न पादावुपगृह्णीयान्नोच्छिष्टं त्वस्य भक्षयेत् ।
मातृवल्गुरुदारेषु वर्तेतावहितस्सदा ॥१.४.२५॥
एवंवृत्तो यथाकालस्नायी सन्ध्यां समाचरन् ।
प्रत्यहं साग्निकार्यःस्यादधीती भैक्षभोजनः ॥१.४.२६॥
आमध्याह्नादधीत्यार्कमुपस्थाय ततःपरं ।
दण्डी भिक्षञ्चरेन्नित्यं गुरोरद्यादनुज्ञया ॥१.४.२७॥
भुञ्जीत कदलीपत्रे वामेनालभ्य पाणिना ।
कुण्डिकास्रावीतं चाम्भः पिबेदन्येन नात्मना ॥१.४.२८॥
न कुलत्थान् न वा माषान् न रसोनं न गृञ्जनं ।
न निर्यासान् न च क्षारान् न शाकं शैग्रवं तथा ॥१.४.२९॥
न नालिकेरजं तैलं न च पक्वं द्रवोष्मणा ।
न पयो गुलसम्मिश्रं न लाजांस्ताम्रभाजने ॥१.४.३०॥
न वर्णदृष्टमश्नीयान्न च कालानुसारिकां ।
न शब्ददृष्टं च तथा प्रत्यक्षलवणं त्यजेत् ॥१.४.३१॥
न माक्षिकं पिबेन्नाम्बु गुलनागरमिश्रितं ।
न रसालां रसं नेक्षोरमेद्ध्यमखिलं त्यजेत् ॥१.४.३२॥
मौनी भुञ्जीतचेत् ब्रूयात् ब्रूयात्तत् संस्कृतैः पदैः ।
नान्तरा विसृजेत् पत्रमालब्धं वामपाणिना ॥१.४.३३॥
न कुर्यात् किञ्चिदुच्छिष्टमोर्द्धमन्त्याम्बुपानतः ।
पत्रस्य स्पर्शनं कुर्यात् नातिमात्राशनो भवेत् ॥१.४.३४॥
न कुर्वीत दिवास्वप्नं कृत्वा तु स्नानमाचरेत् ।
कूपकान्न प्लवेदप्सु नारोहेद् वृक्षहस्तिनौ ॥१.४.३५॥
प्रविशेन्न विनादण्डं देशाद्देशन्न वाससा ।

पाशीकृतशिखी स्याच्च त्रिपुण्ड्रं धारयेत च ॥ १.४.३६ ॥
स्रग्विलेपनताम्बूलधूमालङ्कारदर्पणं ।
अञ्जनोद्वर्तनाश्लीलपरीवादांश्च वर्जयेत् ॥ १.४.३७ ॥
अकाले नार्कमीक्षेत शयीतीन्येन नो सह ।
न पश्येन्मिथुनीभूतान् प्राणिनः स्वानरीनिव ॥ १.४.३८ ॥
न स्त्रिया सह सल्लापमपि कुर्यान्न नर्तनं ।
न च गीतं न वा वाद्यं न च वक्त्रनखादिभिः ॥ १.४.३९ ॥
आलस्यमनृतं हिंसां यच्च वा नाभिनन्दति ।
स्वोपाध्यायस्तदप्येष यत्नेन परिवर्जयेत् ॥ १.४.४० ॥
हित्वा कालमनध्यायमद्ध्येतव्यञ्च सर्वदा ।
ऋते देवोत्सवात् ब्रह्मसाङ्गं सन्निहितस्थले ॥ १.४.४१ ॥
एवं यश्चरति ब्रह्मचर्यव्रतमतन्द्रितः ।
सन्ध्यासु चाग्नौ जाग्रत् स दिव्यान् लोकानवाप्नुयात् ॥ १.४.४२ ॥
कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः ।
व्रतस्यातिक्रमं प्राहुस्तं प्रयत्नेन वर्जयेत् ॥ १.४.४३ ॥
न लुम्पेच्च व्रतं किञ्चिदपि चेत्युदिता स्थितिः ।
प्राय आद्याश्रमस्थस्य यत्र ब्रह्मावतिष्ठते ॥ १.४.४४ ॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
प्रथमस्याध्यायस्य चतुर्थः पादः
प्रथमाध्यायः समाप्तः ॥ १ ॥

द्वितीयाध्यायः
प्रथमः पादः
साकल्येन समाश्रित्य धर्म्मान् स्वानागमोदितान् ।
ब्रह्मचारी चरेद्वेदांश्चतुरस्त्रीनुभौ तु वा ॥ २.१.१ ॥
एकं तु वा यथाशक्ति सहाङ्गैर्द्धर्म्मशास्त्रवित् ।
वाको वाक्यादिकं चान्यदेष धर्म्मो महत्तमः ॥ २.१.२ ॥
तपोयज्ञव्रतादीनां सर्वेषाञ्च सुकर्म्मणां ।
प्राणदं वेदमेवाहुस्तस्मात्तं न परित्यजेत् ॥ २.१.३ ॥
द्विजन्मा य ऋचोधिते स तर्पयति देवताः ।
पितृंश्च मधुदुग्धाभ्यां मध्वाज्याभ्यामपि क्रमात् ॥ २.१.४ ॥
योन्वहं शक्तितोधीते यजूंषि सघृतामृतैः ।
तर्पयत्यमरान् सर्वान् पितृंश्च मधुना तथा ॥ २.१.५ ॥
येन सामानि गीयन्ते यथाशक्ति दिने दिने ।
सोमरान् सोमसर्पिभ्यां पितृंश्च मधुसर्पिषा ॥ २.१.६ ॥
यः प्रत्यहमथर्वाणमधीते शक्तितो द्विजः ।
मेदः स दत्ते देवेभ्यः पितृभ्यो मधुसर्पिषी ॥ २.१.७ ॥

वाको वाक्यं पुराणानि नाराशंसीश्च गाथिकाः ।
इतिहासांश्च योधीते वैद्यकादीनि चान्वहं ॥ २.१.८ ॥
शक्तितस्स मधुक्षीरमांसौदनघृतैस्सुरान् ।
पितृंश्च मधुसर्पिभ्यां सर्वांस्तर्पयति ध्रुवं ॥ २.१.९ ॥
सर्वकामप्रदानेन तृप्तास्तं तर्पयन्ति ते ।
एवं विद्वानधीति स्यादाम्नायादिषु शक्तितः ॥ २.१.१० ॥
सर्वेषामद्धवराणां यत्तपसो यत् परस्य च ।
तत्फलं सर्वमाप्नोति नित्यं स्वाध्यायवान् द्विजः ॥ २.१.११ ॥
नैष्ठिकस्तु गुरोरेव ब्रह्मचार्यन्तिके वसेत् ।
तदभावे तु तत्सूनोर्यावदायुर्धृतव्रतः ॥ २.१.१२ ॥
धर्म्मेणानेन संसाध्य शरीरं संयतेन्द्रियः ।
ब्राह्मं लोकमवाप्नोति स पुनर्न्नेह जायते ॥ २.१.१३ ॥
वेदं व्रतान् वाथान्यसतु पारं नीत्वोभयञ्च वा ।
गुरवे दक्षिणां दत्वा स्नायाच्च तदनुज्ञया ॥ २.१.१४ ॥
अथ स्नातक एव स्याद्यावज्जीवं गृहं व्रजेत् ।
वनं वा जातनिर्वेदः प्रव्रजेद्वा द्विजोत्तमः ॥ २.१.१५ ॥
एक एव गृहं गच्छेज्ज्येष्ठपुत्रो न चेतरः ।
भ्रातृष्वेकस्य पुत्रेण सर्वे ते स्युर्हि पुत्रिणः ॥ २.१.१६ ॥
सम्भाव्यमाने चामुष्मिन्नपुत्र इतरोपि तत् ।
प्राप्तुमर्हति धर्म्मेण रामक्षेत्र इयं स्थितिः ॥ २.१.१७ ॥
गृहं गमिष्यन् विप्रस्तु मृगयेतात्मनस्समां ।
कन्यां वा रोहिणीं गौरीमथवा न च मध्यमां ॥ २.१.१८ ॥
स्त्री तु दृष्टरजस्कापि रामक्षेत्रे न दुष्यति ।
इति वा भार्गवादेशान्मध्यमां नान्यपूर्विकां ॥ २.१.१९ ॥
कल्यां शीलवतीं वल्गुभाषिणीं ससहोदरां ।
असपिण्डां च सुश्रोणीमसमानार्षगोत्रजां ॥ २.१.२० ॥
अथाभिधीयते काचित् सापिण्ड्यप्रक्रिया लघु ।
यद्विज्ञानेन सापिण्ड्यं स्यात् सर्वैरपि सुग्रहं ॥ २.१.२१ ॥
यस्मात् पुंस उभे शाखे सन्तानस्याग्रजन्मनः ।
स्यातां तद्वयजातानां स तु कूटस्थ उच्यते ॥ २.१.२२ ॥
जातस्य पुरुषस्यात्र कूटस्थस्य तु सप्तमात् ।
तावता विप्रकृष्टा तु कन्या मुख्यतमा स्मृतं ॥ २.१.२३ ॥
यद्यसौ भिन्नगोत्रःस्यात् कूटस्थो मातृबान्धवः ।
तस्मात् षष्ठस्य षष्ठी च कन्या मुख्यतमा स्मृता ॥ २.१.२४ ॥
कूटस्थस्य वरस्यापि गोत्रभेदोन्तरा न चेत् ।
वरस्यास्य स कूटस्थः पितृबन्धुरिति स्मृतः ॥ २.१.२५ ॥

पितृबन्धोर्वरस्यापि सप्तमस्य च सप्तमी ।
मातृबन्धोस्तु मुख्यासौ पञ्चमस्य तु पञ्चमी ॥ २.१.२६॥
पञ्चमस्य वरस्याहुः पितृबन्धोस्तु पञ्चमीं ।
मद्ध्यमामापदि ग्राह्यामेके धर्मविचक्षणाः ॥ २.१.२७॥
सामर्थ्यादर्थवादस्य श्रुतिवाक्यस्य सम्मतं ।
मातृबन्धोश्चतुर्थी च वेद्याद्याद्या इहोत्तमा ॥ २.१.२८॥
कूटस्थात् पञ्चमस्य स्त्रीं चतुर्थीमधमां विदुः ।
पञ्चमी मद्ध्यमा तस्मात् षष्ठाद्याः पुनरुत्तमाः ॥ २.१.२९॥
पुरुषापेक्षया श्रेष्ठो विप्रकर्षोधिकः स्त्रियाः ।
इति केचिदथान्ये तं पुरुषस्य वरं विदुः ॥ २.१.३०॥
तेषां मते तु षष्ठस्य मुख्या प्रायेण पञ्चमी ।
स्मर्यते च पुमान् षष्ठः पञ्चमीमुद्वहेदिति ॥ २.१.३१॥
पितुः पितृष्वसुः पित्रोः पितुर्म्मातृष्वसुः सुताः ।
पितुर्म्मातुलपुत्राश्च विज्ञेयाः पितृबन्धवः ॥ २.१.३२॥
एवं गोत्रस्य भेदेपि कूटस्थे पित्र्र्दपक्षता ।
यदि कल्प्येत तेनस्याद्बुस्सहानिष्टसङ्गतिः ॥ २.१.३३॥
तथापि स्वपितुर्म्मातामहस्य प्रपितामहात् ।
कूटस्थादन्यसन्तानजाता कन्या तु सप्तमी ॥ २.१.३४॥
पितृपक्षेपि तातस्य नोद्वाह्यात इति स्थितिः ।
सापिण्डस्य क्षतिस्तूद्ध्र्वं पितृपक्षे हि सप्तमात् ॥ २.१.३५॥
अपि चास्य वरस्यैव पितुरेषा तु कन्यका ।
मातृपक्षगता षष्ठी योग्येति च भवेद्यतः ॥ २.१.३६॥
सापिण्ड्यस्य निवृत्तिस्तु मातृपक्षे हि पञ्चमात् ।
ऊद्ध्र्वं तु मुख्ये कल्पेपि तदेषा स्यादसङ्गतिः ॥ २.१.३७॥
पुत्रस्य येन मार्गेण कन्या या स्याज्जुगुप्सिता ।
पितुस्तेनैव मार्गेण सा च योग्येति यत् भवेत् ॥ २.१.३८॥
तस्मात् सगोत्रः कूटस्थः पितृपक्षतया मतः ।
तस्यैव मुख्यसापिण्ड्यमितरस्य न युज्यते ॥ २.१.३९॥
पित्रादयः सपिण्डाः षल् त्रयो मातामहादयः ।
मातुर्म्मातामहो मातुस्स च यस्तु पितामहः ॥ २.१.४०॥
मातुः पितामहस्तस्य सोपि स्तु पितामहः ।
मातामह्याः पितामह्यास्तथा मातामहस्य च ॥ २.१.४१॥
पितामहस्य चैतेषां चतुर्णाञ्च पितामहाः ।
यद्यन्यतम एतेषां कूटस्थ उभयोरपि ॥ २.१.४२॥
तयोस्सपिण्ड्यमन्योन्यं स्त्रियश्च पुरुषस्य च ।
तेभ्योन्यश्चेन्न सापिण्ड्यमिति सापिण्ड्यवेदिनः ॥ २.१.४३॥

गोत्रप्रवरयोरैक्ये योनियोगः परस्परं ।
निवृत्तेपि च सापिण्ड्ये नष्टो धर्मविदामिह ॥ २.१.४४॥
मातृवंशेपि तुल्यत्वे नोद्वाहः कैश्चिदिष्यते ।
मातुर्वंशो दुहित्रादिः पितुः पुत्रादिकः स्मृतः ॥ २.१.४५॥
इति द्वितीयस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
शिष्टाचारादर्थवादश्रुतिसामर्थ्यतोपि वा ।
केचिद्विशेषमिच्छन्ति सापिण्ड्यपरिचिन्तने ॥ २.२.१॥
अष्टम्याः पितृबन्धोश्च षष्ठ्या वा मातृबन्धुतः ।
सापिण्ड्यस्य निवृत्तत्वादुद्वाहस्सर्वसम्मतः ॥ २.२.२॥
तेषां मते ततोप्यर्वङ्निवृत्तिःस्यादिति स्थितिः ।
विवेकं दर्शयिष्यामस्तन्मतस्यात्र पश्यतः ॥ २.२.३॥
उभयोरेककूटस्थाज्जातयोः कुलशाखयोः ।
एकस्य यावति स्थाने पुमान् यावति कन्यका ॥ २.२.४॥
तावतोरन्यशाखायामपि तौ स्थानयोर्यदि ।
तयोस्सपिण्डताभेदः क्रमस्यास्य तु यावति ॥ २.२.५॥
स्थाने तदन्तं सापिण्ड्यं नात ऊर्द्ध्वमिति स्थितिः ।
कूटस्थात् पञ्चमस्यातो वरस्य तु नियम्यते ॥ २.२.६॥
एतादृशी स्यन्मुख्येति पञ्चमीषु विशेषतः ।
चतुर्थस्य तृतीयस्य चतुर्थ्या च तृतीयया ॥ २.२.७॥
योग एषां मतोनेन सिद्धान्तेनेति च ध्रुवं ।
विवाहस्य विधौ नैतद्वरवध्वोर्विशेषणं ॥ २.२.८॥
अग्राह्यत्वप्रसङ्गेन भिन्नस्थानभुवः स्त्रियाः ।
युक्तायुक्तविवेकार्थं चतुर्थी पञ्चमीवृतौ ॥ २.२.९॥
तासां सुबोधः प्रस्तारः सम्प्रदायेन कथ्यते ।
कन्यायामपि कूटस्थाच्चतुर्थ्यां च वरस्य च ॥ २.२.१०॥
पुरुषक्रमभेदेन भेदाः षोडश मध्यतः
पुत्रौ पुत्री च पुत्रश्च पुत्रः पुत्री च कन्यके ।
भेदाः स्युरित्थं चत्वारो वरकूटस्थमद्ध्यमैः ॥ २.२.११॥
कूटस्था अपि चत्वारो भवेयुस्तैस्तथैव तैः ।
कन्याकूटस्थमध्योत्थैश्चतस्रोपि च कन्यकाः ॥ २.२.१२॥
मातूः पितामहो मातामहो मातुश्च ताविति ।
कूटस्थास्तत्र चत्वारस्तत्कन्याश्च पृथक् पृथक् ॥ २.२.१३॥
वरकूटस्थपुत्रस्य भ्रातुस्सम्बन्धिनः स्वसुः ।
पुत्रस्य वा तयोः पुत्र्याश्चतस्र इह कन्यकाः ॥ २.२.१४॥
चतस्रः स्युस्तथान्येषामिति भेदास्तु षोडश ।

पितामहः स्यात् कूटस्थपुत्रस्तु प्रपितामहे ॥ २.२.१५॥
कूटस्थे सति तद्वारश्चतस्रः स्युर्हि कन्यकाः ।
मातुः पितामहे तस्मिन् मातामहवशा इमे ॥ २.२.१६॥
मातुर्म्मातामहे तद्वदेता मातामहीवशाः ।
अथोपयोग इयता प्रपञ्चेनाभिधीयते ॥ २.२.१७॥
वरकूटस्थयोस्तत्र सम्बन्धो यादृशो भवेत् ।
कन्याकूटस्थयोश्चासौ तादृशश्चेदयं विधिः ॥ २.२.१८॥
तत्तत्सङ्ख्यामिताः कन्यास्तत्तद्वर्गेषु वर्जयेत् ।
सर्वेषामपि वर्ज्या स्यात् सगोत्रत्वादिहादिमा ॥ २.२.१९॥
मातुस्समानगोत्रत्वाद्वर्ज्यते चाखिलान्तिमा ।
पञ्चम्याः पञ्चकस्यापि प्रस्तारःस्यादतः परं ॥ २.२.२०॥
तत्र स्युरष्टौ कूटस्थाश्चतुःषष्टिश्च योषितः ।
अन्तःस्थेषु त्रिषु स्वस्थे द्वयोः प्राक् च निरूपिताः ॥ २.२.२१॥
कूटस्थाष्टकतः कन्यास्तावत्सङ्ख्याः पृथक् पृथक् ।
पुमांसः स्त्री च पुरुषौ पुमांस्त्री पुरुषस्तथा ॥ २.२.२२॥
स्त्री वधूश्च नरश्चापि नरो ना कन्यकापि च ।
कन्यका पुरुषः कन्या पुमान् नारी च कन्यका ॥ २.२.२३॥
स्त्रियश्चेत्यष्ट भेदाःस्युरिह प्रस्तृतिवर्त्मना ।
कूटस्थानपि वक्ष्यामि तानष्टौ च निबोधत ॥ २.२.२४॥
पितामहस्य पित्रोर्य्यौ पितरौ तस्य च स्त्रियः ।
मातामहस्य तन्नार्या इत्यष्टौ कूटसंस्थिताः ॥ २.२.२५॥
पितुः पितामहस्तस्य पत्नी मातामहः पितुः ।
तस्य पत्नी च मातुश्च पितामहनिजस्त्रियौ ॥ २.२.२६॥
मातुर्म्मातामहस्तस्य पत्नी चेति क्रमादिह ।
कूटस्थानामपत्यानि स्युरष्टपरिसङ्ख्यया ॥ २.२.२७॥
भ्रातुःस्वसुश्च पुत्रस्य दुहितुश्च तयोःक्रमात् ।
पौत्र्यःकन्याश्चतस्रःस्युर्द्दौहित्र्यश्चेति कल्पयेत् ॥ २.२.२८॥
उदुह्यन्ते दाक्षिणात्यैर्म्मातुलस्य सुता द्विजैः ।
मध्यदेशे कर्म्मकराः शिल्पिनश्च गवाशिनः ॥ २.२.२९॥
प्राच्या मत्स्याशिनस्सर्वे व्यभिचाररताः स्त्रियः ।
उत्तमा मद्पाचाराः स्पृश्याश्चैव रजस्वलाः ॥ २.२.३०॥
वर्षजाताः प्रगृह्णन्ति भ्रातृभार्यामभर्तृकां ।
इत्थमाचरतःप्राप्तो धर्म एकैकदेशिनां ॥ २.२.३१॥
इति द्वितीयस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
विप्रो विप्रकुलोत्पन्नां धर्म्मात् परिणयेद्वधूं ।

कामेन क्षत्रियां वैश्यां न तु शूद्रां कथञ्चन ॥ २.३.१॥
विवाहा ब्राह्मदैवार्षप्राजापत्यास्तथासुरः ।
गान्धर्वराक्षसौ चैव सप्त शस्ताः प्रकीर्तिताः ॥ २.३.२॥
पैशाचिकाष्टमस्तेषां तं विद्यात् कुलनाशनं ।
अशस्तोतस्स विज्ञेयः पापिष्ठः पापिनामपि ॥ २.३.३॥
आद्याश्चत्वार एतेषु विप्राणां वृद्धिहेतवः ।
क्षत्रियस्य तु गान्धर्वो राक्षसश्च तथा स्मृतः ॥ २.३.४॥
आसुरोपि च वैश्यस्य स निन्द्यो विप्रभुजोः ।
आपन्नोपि न कुर्वीत तत्र विप्रस्तदाश्रयं ॥ २.३.५॥
पित्रा दत्तां समाहूय सप्रावरणभूषणां ।
गृह्णाति यत्स तु प्रोक्तो ब्राह्मो वैवाहिको विधिः ॥ २.३.६॥
वितायमाने यज्ञे तु दत्तां कन्यामलङ्कृतां ।
ऋत्विगृह्णाति यत् कर्म्म कुर्वन् दैवस्स कथ्यते ॥ २.३.७॥
दत्वा गोमिथुनं कन्यामादत्ते यदसौविधिः ।
आर्षः सहोभौ चरतं सहधर्ममिति ब्रुवन् ॥ २.३.८॥
यत् प्रयच्छति यच्चेमां गृह्णाति स ततःपरः ।
ज्ञातिभ्यो द्रविणं दत्वा कन्यादानं यदासुरः ॥ २.३.९॥
स विधिर्वर्ज्य एवासौ विप्राणां भार्गवक्षितौ ।
क्रीता द्रव्येण या नारी सा न पत्नीत्वमर्हति ॥ २.३.१०॥
दासीपदं समारोढुमर्हत्येषेति भार्गवः ।
नेच्छामस्तद्विजातीनां त्रयाणामप्यमुं विधिं ॥ २.३.११॥
आसुरेण विधानेन दाता स्यान्मांसविक्रयी ।
कन्यायाश्च वरस्यापि यो भवेत् स्वेच्छया कृतः ॥ २.३.१२॥
योगःपरस्परेणायं गान्धर्वःकामसम्भवः ।
छित्वा भित्वा च हत्वा च प्रलपन्तीं स्त्रियं बलात् ॥ २.३.१३॥
परिगृह्णाति यत् सोयं राक्षसो विधिरुच्यते ।
मत्तां यद्वा प्रमत्तां वा सुप्तां वा यद्रहो व्रजेत् ॥ २.३.१४॥
पापिष्ठोसौ विवाहेषु पैशाचोष्टम उच्यते ।
ब्राह्मादिषु यथाचारं केनापि विधिना पिता ॥ २.३.१५॥
दद्यात् कन्यां वरश्चैनां परीक्ष्यैवपरीक्षितः ।
पुंस्त्व एव परीक्षा तु प्रथमं शास्त्रचोदिता ॥ २.३.१६॥
तां कुर्यान्न तु षण्डाय कन्यां दद्याद्विपद्यपि ।
स्त्रीपुंसलक्ष्महीनश्च प्रसुप्तव्यञ्जनस्तथा ॥ २.३.१७॥
पक्षोपहतरेताश्च स्रवद्रेता मुखेभगः ।
गुरुशप्तश्च सेर्ष्यश्च दुराराधोफलेन्द्रियः ॥ २.३.१८॥
दीर्घतीव्रामयो देवद्वेषी च परतल्पगः ।

शालीनबीजः आक्षिप्तबीजश्चात्यन्तिकामुकः ॥ २.३.१९॥
स्थविरश्चेति विज्ञेयाः षण्डास्तेमी तु षोडश ।
नार्हन्ति कन्यकामेते कदाचिदपि धर्मतः ॥ २.३.२०॥
तान् प्रयत्नेन विज्ञाय न तेभ्यः प्रदिशेत् पिता ।
नोन्मत्ताय न मूकाय बधिराय पङ्गवे ॥ २.३.२१॥
न खञ्जाय न चान्धाय नापस्मारहताय च ।
न चाभिजनहीनाय विरुद्धसमयाय च ॥ २.३.२२॥
नैव भिन्नशिखायापि न तस्मै द्वेष्टि यञ्च सा ।
पुंस्त्वञ्च यौवनं रूपं वित्तञ्च श्रुतिशालितां ॥ २.३.२३॥
प्रियंवदत्वं बह्वन्नदातृत्वमिति सप्तकं ।
विचिन्त्य कन्या दातव्या पित्रा त्वभिजनान्विते ॥ २.३.२४॥
आत्मनः कृतकृत्यत्वं बन्धूनामभिनन्दनं ।
यावता स्यादनिन्दे च सतां तावत् गवेषयेत् ॥ २.३.२५॥
दत्तायास्सकृदालोच्य केचिदिच्छन्त्यनन्तरं ।
प्रत्याहरणमन्यस्मै रामक्षेत्रे तु नेष्यते ॥ २.३.२६॥
पाणिं गृह्णाति यस्तस्या नास्य प्रतिनिधिर्यतः ।
बहुधा स्वपरीक्ष्यैव कन्यां दद्यादनापदि ॥ २.३.२७॥
असतीमुद्वहन् कन्यामात्मना सह पूर्वजान् ।
प्रस्थापयति घोरेभ्यो निरयेभ्यो निजात् पतेत् ॥ २.३.२८॥
नाधिकाङ्गीं न हीनाङ्गीं नालोमामतिलोमशां ।
नोद्वहेन्नैव वाचालां न गवाक्षनिरीक्षिणीं ॥ २.३.२९॥
गन्धरूपवतीं हासे ककुदावर्तिनीं तथा ।
समपीनोन्नतोरोजां सुशीलामुद्वहेत् स्त्रियं ॥ २.३.३०॥
घटनामपि चेक्षेत मिथस्तारादिभिर्द्वयोः ।
ज्योतिर्विदुभयोः पित्रोर्विस्रब्धोलोलुपः शुचिः ॥ २.३.३१॥
पुंसश्चित्तपरीक्षायां तदाचारादिसाधनं ।
स्त्रियास्तु तत्र वक्ष्यामि विशेषादपि किञ्चन ॥ २.३.३२॥
इति द्वितीयस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
अथोत्तरायणे काले शुभवारे शुभे तिथौ ।
यावत्सोमस्समाश्रित्य चरत्युत्तरफल्गुनिः ॥ २.४.१॥
स्नात्वा मुहूर्ते मैत्रे तु प्रतिपूज्य गणाधिपं ।
तावत् समुल्लिखेत् भूमौ रेखाषोडशकं क्रमात् ॥ २.४.२॥
अष्टौ प्रागायतास्तत्र तथाष्टा उत्तरायताः ।
क्रमाद्ध्रस्वाः क्रमाद्दीर्घाः संहृतौ चापि विस्तृतौ ॥ २.४.३॥
चतस्रश्च चतस्रश्च यथा स्युर्विलिखेत्तथा ।

चत्वारि चतुरश्राणि स्युरल्पाल्पान्तरान्तरं ॥ २.४.४॥
रेखाग्राभ्यामथैकैकं खण्डमभ्यन्तरे पुनः ।
प्रकल्प्य रेखास्थानेषु सूच्या व्यक्तिमुदीरयेत् ॥ २.४.५॥
शुभ्रैः षष्टिकधान्यानां तण्डुलैरथवा यवैः ।
रेखान्तराले सर्वत्र विकिरेद् व्रीहितण्डुलान् ॥ २.४.६॥
धौतान् कुलत्थगोधूमायवदूर्वाङ्कुरान्वितान् ।
तुलसीदलसिद्धार्थकुशकाशैश्च मिश्रितान् ॥ २.४.७॥
ततःप्राङ्मुख आसीनः सपवित्रकरः शुचिः ।
द्वौ द्वौ कोणगतौ हित्वा खण्डेष्वन्येषु विन्यसेत् ॥ २.४.८॥
दर्भासनानि सर्वेषु वीथिषु द्वादशस्वपि ।
तेष्वमी देवताः पूज्याः सर्वेषु च यथाविधि ॥ २.४.९॥
वीथीषु द्वादशादित्यान् प्रादक्षिण्येन पूजयेत् ।
अन्तः पञ्चसु कोणेषु मद्ध्ये पूज्यः प्रजापतिः ॥ २.४.१०॥
ऐशे द्यावापृथिव्यौ च सन्ध्यामाग्नेयदिग्गते ।
धर्मञ्च राक्षसे खण्डे मारुते मरुतं यजेत् ॥ २.४.११॥
गोष्ठवेदिनदीक्षेत्रमृल्पिण्डांश्चतुरः पुरः ।
अवशिष्टोद्ध्र्वदिकोणगतखण्डचतुष्टये ॥ २.४.१२॥
चतुष्पथोषरक्रोडक्षितिशार्करभूमृदा ।
क्लिप्तान् पिण्डानधःखण्डेष्वपि विन्यस्य तान् पुनः ॥ २.४.१३॥
ऋतमित्यादिकं मन्त्रं तथा यत्सत्यमित्यपि ।
स्पृशन् जप्त्वा पुनस्तेषु गृहाणैकमितीरयेत् ॥ २.४.१४॥
परिक्रम्य त्रिवारं तन्मण्डलं प्रयता तदा ।
गृह्णीयात्तेषु पिण्डेषु कन्या चैकं यथेप्सितं ॥ २.४.१५॥
गृहीतेन च पिण्डेन विद्यात् भाविशुभाशुभं ।
सा गृहीतवती कन्या यदि गोष्ठमृदा कृतं ॥ २.४.१६॥
नूनं स्यात् पशूमत्येषेत्यन्तर्विश्वस्तततां व्रजेत् ।
यदि वेदीमृदा क्लिप्तं धर्मवत्येविसा भवेत् ॥ २.४.१७॥
नदीमृल्पिण्डहरणे विजानीयान्मनस्विनीं ।
विज्ञेयान्नवती कन्या क्षेत्रमृल्पिण्डधारणात् ॥ २.४.१८॥
एतदन्यतमादाने साध्वीमाहुः कुमारिकां ।
ज्ञेया प्रव्राजिका दुष्टा कुटिला भर्तृनाशिनी ॥ २.४.१९॥
अनेन विधिना साध्वीं विज्ञाय वृणुयात्ततः ।
कन्यां पिता तु योग्याय तस्मै दद्याच्च तुष्टधीः ॥ २.४.२०॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
द्वितीयस्याध्यायस्य चतुर्थः पादः
द्वितीयोध्यायः समाप्तः ॥ २॥

तृतीयाध्यायः

प्रथमः पादः

वितरिष्यन् पिता पुत्रीं वराय प्रर्थनावते ।
कुलतो लक्षणेनापि प्रशस्तायेदमाचरेत् ॥ ३.१.१॥
प्रकल्प्य दिवसं पूर्वं कन्यादाने त्वनिन्दितं ।
आसन्ने सुमुहूर्ते तु कुर्यादुद्वाहकौतुकं ॥ ३.१.२॥
शिलाभेदे तरुच्छेदे गृहारम्भविधावपि ।
भुवश्च खनने यद्वच्चरेद्वैवाहिके तथा ॥ ३.१.३॥
चतुर्ष्वेतेषु कामेन प्रवृत्तो गृहमेध्यपि ।
अकृत्वा पवमानेष्टिमन्यथा पातकी भवेत् ॥ ३.१.४॥
कारयेदुपकार्यादि यावदर्थं सुशोभनं ।
अलक्ष्मीं परिनिर्हृत्य गृहानुज्वलयेत् भृशं ॥ ३.१.५॥
भित्तिस्तम्भकवाटेषु तथा सोपानपङ्क्तिषु ।
कान्तिं कौतुकरेखाभिः कारयेत सुगन्धिभिः ॥ ३.१.६॥
अभिद्वारञ्च सर्वत्र वितन्येत स्रगावलिं ।
स्थापयेत् कदलीकाण्डानामपक्वफलोज्वलान् ॥ ३.१.७॥
स्तम्भेषूभयतोद्वारं केरपूगफलादिभिः ।
समेतान् हरिताच्छिन्नपत्रान् दृष्टिमनोहरान् ॥ ३.१.८॥
कुमुदोत्पलकल्हारसरसीरुहचम्पकैः ।
मल्लिकाकन्दमन्दारकेतकाशोकजातिभिः ॥ ३.१.९॥
अन्यैरपीदृशैः पुष्पैर्विहिताभिर्यथोचितं ।
सम्मृष्टसिक्तमालाभिर्म्मण्डयित्वा श्रियं नयेत् ॥ ३.१.१०॥
सम्पाद्य पूज्यपूजासु यद्यदाख्यातं यद्यदिष्टं यथाकुलं ।
सुतार्थे युद्यदाख्यातं तत्तन्निर्वर्त्य यत्नतः ॥ ३.१.११॥
प्रतीक्षमाणो जामातुरागतिं सम्प्रतीतधीः ।
ज्ञातिभिस्सहवर्तेत मङ्गलाशंसमानसः ॥ ३.१.१२॥
विवाहार्थी शुभे कृत्वा काले वैवाहिकाशनं ।
प्रस्थाय बन्धुभिस्साकं श्वशुरस्य गृहान् व्रजेत् ॥ ३.१.१३॥
मङ्गल्यसूक्तपाठेन प्रस्थितः पथि गां वृषं ।
देवालयञ्च प्रक्रम्य दक्षिणेन वनस्पतीन् ॥ ३.१.१४॥
वामेन चातकञ्चैव वीडालञ्च श्वगर्दभौ ।
शिवाशाखामृगश्येननकुलाद्यवलोकने ॥ ३.१.१५॥
शान्तिदानं स्वस्त्ययनम्मन्त्रपाठं चकारयेत् ।
आसन्नस्समभिव्रज्य तेन नीतो यथाविधि ॥ ३.१.१६॥
वामेन वास्तुमाक्रम्य दक्षिणेनाङ्कणं पुरः ।
अङ्घ्रिणाहत्य वामेन प्रघणञ्चेत्यनुक्रमात् ॥ ३.१.१७॥

गृहाभ्यन्तरमाक्रामेद्दक्षिणेनैव चाङ्घ्रिणा ।
प्रथमं भूतिकामस्य प्रवेशोयमुदाहृतः ॥ ३.१.१८ ॥
अथ कन्यार्थिने तस्मै यथावदनुमोदितः ।
पिता च कन्यकां स्नातामलदकृत्यावगुण्ठितां ॥ ३.१.१९ ॥
सुमुहूर्त उपानीय दद्यादुदकपूर्वकं ।
स चैनां प्रतिगृह्णीयात् स्वगृह्योक्तेन वर्त्मना ॥ ३.१.२० ॥
ग्राह्यो विप्रस्त्रीयाः पाणिर्वरेणोद्वाहकर्म्मणि ।
पुत्रा एव प्रजायेरन्नित्यङ्गुष्ठं विनाग्रतः ॥ ३.१.२१ ॥
दौहित्रं न स्पृशेदन्यं तद्वयं चोभयाग्रही ।
यात्रायामुपसन्नायां यानं वा नावमेव वा ॥ ३.१.२२ ॥
आरोप्याग्निं पुरस्कृत्य तान्नयेन्निजवेश्मने ।
कल्याणेषु च देशेषु तद्वदेव चतुष्पथे ॥ ३.१.२३ ॥
मन्त्रजापी तथेक्षेत वासे वासे समीक्षकान् ।
द्वावेतानुगन्तव्यौ सुहृल्बन्धुजनैस्तदा ॥ ३.१.२४ ॥
पुरस्ताच्च प्रतिष्ठेरन् पदिकाः खल्गपाणयः ।
दासीरुभयतः कृत्वा वहेयुस्ताश्च वाहकाः ॥ ३.१.२५ ॥
यथा न जायेताशुद्धिस्तथा शूद्रादयश्चतौ ।
भजेयुरग्नेरासक्तिं वर्जयेयुर्विशेषतः ॥ ३.१.२६ ॥
वाद्यैर्म्मङ्गलनिर्ह्रादैः पूरयेयुश्च दिङ्मुखं ।
स्वलङ्कृतं नयेद्वेश्म दुर्वादध्यर्पितार्हणं ॥ ३.१.२७ ॥
आगर्भतो यथाचारं तां निसर्गानुजीविभिः ।
प्रवेशयेत् समन्त्रश्च सुमुहूर्ते ततो निशि ॥ ३.१.२८ ॥
होमं कुर्याद्यथाचारमानीतेग्नौ तया सह ।
अत ऊद्ध्र्वमुभौ स्यातामक्षारलवणाशिनौ ॥ ३.१.२९ ॥
तावधश्शायिनौ तिस्रो रात्रीरस्खलितव्रतौ ।
गन्धस्रगन्नवस्त्राद्यैर्विप्रान् प्रावेशिके दिने ॥ ३.१.३० ॥
अन्यांश्च प्रीणयेत्सर्वान् विभवे सति विस्तरात् ।
वृद्धा जीवत्सुता भर्तृमत्यो भूदेवयोषितः ॥ ३.१.३१ ॥
यद्यत् ब्रूयुरवैरेण तत्तदीक्षेत चाखिलं ।
तिस्रो रात्रीस्तथा नीत्वा चतुर्थस्नानमाचरेत् ॥ ३.१.३२ ॥
चतुर्थिं रजनीं प्राप्य सेकं कुर्याद्यथागमं ।
निमन्त्रयेयुस्तस्मात् प्राङ्न तमन्ये स्वकर्म्मसु ॥ ३.१.३३ ॥
अनर्च्चकस्स चार्च्चादौ नित्यं व्रतमलोपयन् ।
अथारभेत च स्थालीपाकं समनुवर्तयन् ॥ ३.१.३४ ॥
मासमेकं सहासीनः पत्न्या तस्य समापनात् ।
प्राङ्नान्यदेशगामी स्यात् मासादूद्ध्र्वमुभौ पुनः ॥ ३.१.३५ ॥

पक्षान्तौ समनुप्रेक्ष्य कुर्वीत द्विश्च मासिकं ।
दर्शश्च पौर्णमासश्च नाम्ना तौ मुनिभिः स्मृतौ ॥ ३.१.३६॥
न विलुम्पेदमू इष्टी गृहस्थः श्रद्धयेरितः ।
सर्वदाग्निं प्रतीक्षेत प्रत्यहं व्रीहिभिर्य्यजेत् ॥ ३.१.३७॥
निर्वाणं दीपयेत् पूर्वं द्वादशाहान्त उच्यते ।
दीक्षान्तरेग्नौ निर्वाणे समन्वारम्भपूर्वकं ॥ ३.१.३८॥
प्रोक्ष्य भस्मन्यपहता असुरा इति तत् पुनः ।
उद्धूल्य तत्र धूलौ तु तिरोभूयाग्निमास्थितं ॥ ३.१.३९॥
निरायतनमारोप्य समिधि त्वयमादिना ।
शोधयेत् भस्म सन्त्यज्य गोमयेन निरम्बुना ॥ ३.१.४०॥
तत्रैवायतने पश्चान्निधायाग्निमनुक्षिपेत् ।
तत्राग्नावग्निनारूढां समिधं तां समन्त्रकं ॥ ३.१.४१॥
मन्त्रस्तत्रायमाजुह्वान इत्यादिक इष्यते ।
उल्बुद्धयस्वादिरन्यश्च सहपाठादथोदकैः ॥ ३.१.४२॥
आलिप्यात्रैव पूर्णाहुत्या रीत्या वक्ष्यमाणया ।
आज्यमुल्पाद्य कुर्याद्वा विंशतिं च स्रुवाहुतिं ॥ ३.१.४३॥
तत्र मन्त्रस्त्वयाश्चाग्नेरित्ययं प्रथमोदितः ।
द्वितीयकोग्निर्होतेति तृतीयादेरयं क्रमः ॥ ३.१.४४॥
ब्राह्मणोग्निः पृथिव्यन्तरिक्षं वायुश्च चन्द्रमाः ।
अन्नं द्यौरपि चादित्यः प्रजापतिरमून् दश ॥ ३.१.४५॥
एकहोता द्विहोतेति क्रमेणोपरि योजितान् ।
विद्यात्तृतीयकादीनां मन्त्राणां प्रमुखेचरान् ॥ ३.१.४६॥
प्रसिध्या शेषसम्पत्तिरित्थं ते द्वादशोदिताः ।
ततः परो मनोज्योतिर्जुषतामित्ययं मनुः ॥ ३.१.४७॥
यन्म आत्मन इत्येष विज्ञेयोत्र चतुर्द्दशः ।
पुनरग्निरिरिति ज्ञेय उत्तर प्रणवादिकाः ॥ ३.१.४८॥
तिस्रो व्याहृतयः पश्चात् चतस्रः केवलाश्च ताः ।
इति द्वाविंशतिर्म्मन्त्रास्तेषु प्रणवपूर्विकाः ॥ ३.१.४९॥
तिस्रो विना हि सन्नेग्नौ होममद्धये च पर्वणोः ।
एकोना विंशतिग्राह्या सन्नेग्नौ पुनरन्यदा ॥ ३.१.५०॥
संशोध्य गोमयेनैवायतनं तत्र चानले ।
निहिते घृतमुल्पाद्य वक्ष्यमाणेन वर्त्मना ॥ ३.१.५१॥
निष्कृतिं विदधीतीथ स्रुवाहुतिमयादिना ।
एवं वैवाहिकेग्नौ तु निर्वाणे दीपनं विदुः ॥ ३.१.५२॥
अकृतेत्रास्य विच्छित्तिर्द्वादशाहात् परं भवेत्
इति तृतीयस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः

नष्टेग्नौ निदधीतामुं सम्भारैः सम्भृते पुनः ।
ससम्भारनिधानस्य क्रमं वक्ष्ये समासतः ॥ ३.२.१॥
अन्वास्याभ्यर्च्य विघ्नेशमग्न्युच्छेदस्य निष्कृतिं ।
कुर्वीत तदनु ब्रह्मा तूष्णीमासनतस्तृणं ॥ ३.२.२॥
निरस्येदथ तं धौतहस्तः कृतकरग्रहः ।
तूष्णीं निवेशयेद्दद्यात् पवित्रं चाथ मार्जिते ॥ ३.२.३॥
स्थण्डिले शकलेन त्रिः कुर्यात् प्राक्संस्थमुद्धतिं ।
मध्यतो दक्षिणेनापि वामेन च यथाक्रमं ॥ ३.२.४॥
अथ तत्राम्बुना प्रोक्ष्य सम्भारान् सिकतादिकान् ।
पात्रे दक्षिणहस्तेन योजयेल्क्रमशाखिलान् ॥ ३.२.५॥
सिकतामूषरक्ष्माखुवन्मीकह्रदसम्भवाः ।
वराहखातजाः पञ्च मृदश्च नलिनीदलं ॥ ३.२.६॥
सन्धानीयशिलां शाखाः पञ्चाश्वत्थी सवाङ्गजाः ।
पालाशी शमिजा वैकङ्कती चेति चतुर्द्दश ॥ ३.२.७॥
अशन्याहतवृक्षस्य शकलञ्च वदन्ति तान् ।
अथ तान् ब्रह्मणो हस्ते प्रदायायतनात् बहिः ॥ ३.२.८॥
शकलं सन्निरस्यापःस्पृष्ट्वात्र सिकताः किरेत् ।
भूर्भुवस्सुवरित्येवं जप्वा मद्धयेथ दक्षिणे ॥ ३.२.९॥
वामे चेत्यत्र पूर्वाग्रास्तिस्रो मध्ये ततस्त्वधः ।
ऊद्धर्वञ्चेत्युदगग्राश्च तिस्र इत्थं षडुल्लिखेत् ॥ ३.२.१०॥
रेखाक्रमादथोन्मृष्टदोःप्रेक्ष्य शकलं त्यजेत् ।
कोणे नैर्ऋतकेथापः स्पृष्ट्वा ब्रह्माणमुद्दिशन् ॥ ३.२.११॥
ओमग्निमाहरिष्यामीत्याभाषेत ततोमुना ।
ओमग्निमाहरेत्युक्तस्तत आदाय सम्भृतीः ॥ ३.२.१२॥
व्याहृत्योदक्षिपेत्तास्तथाग्निञ्चायतने पुनः ।
ज्वलयित्वोपलेपादि वक्ष्यमाणेन वर्त्मना ॥ ३.२.१३॥
आज्यस्य च स्रुचश्चापि संस्कारं मन्त्रसेकवत् ।
कुर्यादथ चतुग्राही तिष्ठन्नुल्सृज्य चासनं ॥ ३.२.१४॥
पूरयित्वाथ पर्युक्ष्य निक्षिप्य समिधं पुनः ।
स्रुचा पूर्णाहुतिं कुर्यान्मन्त्रोच्चारणपूर्वकं ॥ ३.२.१५॥
मन्त्रोत्र सप्त ते अग्ने इति विद्वत्भिरिष्यते ।
पूर्णाहुतिपरं दद्यात्ततश्च ब्रह्मणे पशुं ॥ ३.२.१६॥
तत आसीन आज्येन कुर्याच्छेषैरपि ग्रहैः ।
तिस्रश्चतस्रो द्वे चाथ चतस्रश्चाहुतीः क्रमात् ॥ ३.२.१७॥
आद्ये तन्तुं तथोल्बुध्यस्व त्रयस्त्रिंशदित्यपि ।

द्वितीये मनवस्त्वग्ने अभ्येत्यादिस्ततःपरः ॥ ३.२.१८ ॥
अग्ने अङ्गिर इत्येष पुनरूर्जेति चापरः ।
चरमस्सह रय्येति तृतीये यन्म इत्यसौ ॥ ३.२.१९ ॥
पुनरग्निरिति त्वन्यस्तुर्ये व्याहृतयो मताः ।
चतस्र इति तन्मन्त्रास्समाप्याज्यं ततः परं ॥ ३.२.२० ॥
मन्त्रेणासिच्य गां दत्वा ब्रह्मणे तदनु स्वयं ।
उत्थाप्याराधयेदग्निं गणेशञ्च विसर्जयेत् ॥ ३.२.२१ ॥
निधानमिति गृह्याग्नेर्भार्गवेण प्रपञ्चितं ।
सङ्क्षिप्यैव मया प्रोक्तं क्षेमकृत् गृहमेधिनां ॥ ३.२.२२ ॥
इति तृतीयस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
व्याख्यास्यन्तेग्निदोषाश्च सङ्क्षेपादुपरिक्कचित् ।
लघुगुर्वनुरोधेन प्रायश्चित्तञ्च कृत्स्नशः ॥ ३.३.१ ॥
तानपीक्षेत सर्वेष्वप्यविशेषेण भार्गवः ।
आशास्ते पवमानाख्यं स्थालीपाकं स कत्थ्यते ॥ ३.३.२ ॥
समिध्यारोप्य तत्राग्निं निरायतनमेव तां ।
उदग्विन्यस्य सन्त्यज्य भसितेन सहानलं ॥ ३.३.३ ॥
संशोध्यायतनं पश्चात् गोमयेन समन्ततः ।
अग्नावनुद्धृते तत्र निहिते समिधं क्षिपेत् ॥ ३.३.४ ॥
मन्त्रपूर्वकमारोपिताग्निं पुनरतः परं ।
अन्वाधानादिकं सर्वं तत्र नित्यवदाचरेत् ॥ ३.३.५ ॥
स्यादग्निः पवमानोग्निः पावकोग्निःशुचिःक्रमात् ।
देवता इत्ययं भेदो निर्वापप्रोक्षणे पुनः ॥ ३.३.६ ॥
अग्नये पवमानायेत्यादिरीत्या समुन्नयेत् ।
हविर्द्वेधा विभज्याथ दक्षिणादिषु तु क्रमात् ॥ ३.३.७ ॥
तन्नामानि चतुर्थ्यन्तान्यादितस्त्विदमास ह ।
स्पृशेदुच्चार्य तैरेव स्वाहान्तैर्होम इष्यते ॥ ३.३.८ ॥
समाप्तेस्मिन्नथोत्पाद्य घृतं कृत्वा चतुर्ग्रहं ।
पर्युक्ष्य समिधं क्षिप्त्वा मन्त्रं प्रोच्य मनस्वतीं ॥ ३.३.९ ॥
आसीनो जुहुयाच्छेषं कर्म्मं पश्चात् समापयेत् ।
इत्ययं पवमानाख्यः स्थालीपाक उदाहृतः ॥ ३.३.१० ॥
पूर्णाहुतिं वा सर्वत्र तत्स्थान इति भार्गवः ।
तत्क्रमस्तत्र कर्तव्यः सकृत् परिसमूहनं ॥ ३.३.११ ॥
सकृत् पर्युक्ष्य चास्तीर्य सकृत् पर्युक्ष्य सादयेत् ।
उदगग्नेरथैतानि वस्तूनि तु यथाक्रमं ॥ ३.३.१२ ॥
प्रोक्षणीपात्रमाज्यस्य स्थालीं चापि स्रुवं स्रुचं ।

अभिद्योतनदर्भांश्च चतस्रस्समिधोपि च ॥ ३.३.१३॥
अभिद्योतनतो द्वाभ्यां बन्धं पश्चात् पवित्रकं ।
विन्यस्य प्रोक्षणीपात्रे प्रागग्रमथ वारिणा ॥ ३.३.१४॥
आसिच्य प्राक् तदुत्पूय सपवित्रं तदम्बुना ।
त्रिरभ्युक्ष्य घृतस्थाल्यां विन्यस्याथ पवित्रकं ॥ ३.३.१५॥
आज्यमासिच्य तच्चोदग्व्यूढेङ्गारे हविर्भुजः ।
न्यस्याभिद्योत्य दर्भाग्रसंयुतञ्चावरोपयेत् ॥ ३.३.१६॥
कृतपर्यग्निमङ्गारं सङ्कलय्य ततः परं ।
संस्पृश्यापः पवित्रेण तूष्णीमुत्पवनं चरेत् ॥ ३.३.१७॥
प्राक् प्रत्युक्तदविच्छेदमिति भेद इह स्मृतः ।
विस्रस्तं तद्विधायाथ पवित्रमनले क्षिपेत् ॥ ३.३.१८॥
स्रुचस्तापञ्च सम्मार्गं प्रोक्षणञ्च प्रतापनं ।
अग्नेरलङ्कृतिं पश्चात् समन्त्रपरिषेचनं ॥ ३.३.१९॥
कृत्वा चतुर्गृहीताज्यं स्रुच्युत्थायानुयुज्य च ।
पर्युक्ष्य समिधं क्षिप्त्वा घृतेन जुहुयात् सकृत् ॥ ३.३.२०॥
पुनश्चैवं मनस्वत्या परन्तूत्थानतो विना ।
सन्धायोच्चरिते द्वे द्वे ऋचौ मन्त्राः क्रमादिह ॥ ३.३.२१॥
अग्न आयूंष्यथाग्ने पवस्वाग्ने पावकेति च ।
स नः पावक इत्येषा तथान्याग्निश्शुचीत्यपि ॥ ३.३.२२॥
शुभग्ने शुभयश्चेति मनोज्योतिश्च तं ऋचः ।
समन्त्रपरिषेकादि कृत्वाथ च समापयेत् ॥ ३.३.२३॥
पावमानी समाख्याता पूर्णाहुतिरियं मता ।
अन्यत्राप्यनुसन्धेया रीतिरत्र प्रदर्शिता ॥ ३.३.२४॥
इति तृतीयस्याध्यायस्य तृतीयःपादः

अथ चतुर्थः पादः
दर्शश्च पौर्णमासश्च द्वावेतौ गृहमेधिनः ।
ऊद्ध्वं जिगमिषोः पक्षौ तौ न विच्छेदमर्हतः ॥ ३.४.१॥
विच्छिन्नयोस्तु कुर्वीत तयोरत्ययनिष्कृतिं ।
अग्निं पथिकृतं नाम तत्र दर्शात्यये यजेत् ॥ ३.४.२॥
पौर्णमासात्यये तद्वदग्निं वैश्वानरं तथा ।
एतद्वयातिपत्तौ तु पृथग्योगेन वा यजेत् ॥ ३.४.३॥
अन्वारम्भणिकामिष्टिं कुर्यादिष्टित्रयात्यये ।
पञ्चाग्नीन् पवमानादीन् यजेच्च द्वादशात्यये ॥ ३.४.४॥
सप्त तान् पवमानादीन् यजेत् संवत्सरात्यये ।
तत्तत्पूर्णाहुतीः कुर्यादथवैतेषु सर्वतः ॥ ३.४.५॥
पूर्णाहुतिषु सर्वत्र केचिदाहुः स्रुवाहुतीः ।

तस्मात्ता एव वा सम्यगन्यत्र परिवक्ष्यते ॥ ३.४.६॥
अहो भारो गृहस्थस्य महानेषु क्रियाक्रमः ।
शेषोथवा महानास्ते स्वभावनियतोखिलः ॥ ३.४.७॥
किन्त्वयं दोग्द्धि नो दुःखं महदेव न तादृशं ।
ततोधिकं वा सूते च सुखं कर्म्मसु निष्ठया ॥ ३.४.८॥
पन्थानो बहवः प्रेत्य यियासोगृहमेधिनः ।
अनग्नेरस्य कात्स्न्र्येन तानाहूस्तमसावृतान् ॥ ३.४.९॥
तस्मादग्निं सदा रक्षन् प्रयतेतान्यकर्म्मसु ।
अग्नौ संरक्षिते सर्वं रक्षितं भार्गवोब्रवीत् ॥ ३.४.१०॥
जागर्ति सततं यस्य गृह्याग्निः प्रयतो गृहे ।
स कामानिह सम्भुज्य प्रेत्य स्वर्गेषु मोदते ॥ ३.४.११॥
यस्य श्रद्धाग्निरक्षायामपद्यपि दुरत्यये ।
तत्गृहं पुण्यतीर्थं स्यादितरत् काकपल्वलं ॥ ३.४.१२॥
हूयमानो यथाकालं गृह्योग्निर्यत्र वर्तते ।
तत् गृहं न प्रतीक्रन्ते रक्षोयक्षापमृत्यवः ॥ ३.४.१३॥
यदनग्निषु देवेभ्यः पितृभ्यो वा हुतं हविः ।
यच्च दत्तं गृहस्थेषु तच्च निष्फलतां व्रजेत् ॥ ३.४.१४॥
अग्निहीनेन सन्ध्यासु दीयते गृहमेधिना ।
यदर्घ्यं तत् बलादेत्य हरेयुरसुराः किल ॥ ३.४.१५॥
तस्मादग्निं प्रयत्नेन रक्षेद्यो गृहमेयिवान् ।
अन्यथा शूद्रतां गच्छेद्द्विजोपि श्रोत्रियोप्यसौ ॥ ३.४.१६॥
स्नानादिषु यथाकालं प्रत्यहं प्रयतेत च ।
एवंविधैस्स धर्म्मैस्तु ब्राह्मे लोके महीयते ॥ ३.४.१७॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
तृतीयस्याध्यायस्य चतुर्थः पादः
तृतीयोध्यायः समाप्तः ॥ ३॥

चतुर्थाध्यायः
प्रथमः पादः
ब्राह्मे मुहूर्ते उत्थाय विसृजेन्मूत्रवर्च्चसी ।
दक्षिणाभिमुखो रात्रौ दिवाचेत्तदुदङ्मुखः ॥ ४.१.१॥
सन्ध्ययोश्च द्विजाः कुर्युः कर्णस्थब्रह्मसूत्रिणः ।
यतवाचश्च सर्वेपि यथाकामन्तु बालकाः ॥ ४.१.२॥
न भूमौ फालकृष्टायां नाछन्नायां चोषरे ।
न शाद्वले न छायायां न ससत्वे न गर्तके ॥ ४.१.३॥
न वन्मीके न रत्थ्यायां नोद्याने नोदकान्तिके ।
न भस्मनि न चाङ्गारे नोदके न च गोमये ॥ ४.१.४॥

तुषाकपालगोष्ठेषु न देवायतनेषु च ।
न प्रत्यनिलमर्कं वा नाग्निस्त्रीगुरुबान्धवान् ॥ ४.१.५॥
परिमृज्य गुदं सम्यग्गृहीत्वा शिश्नमुत्थितः ।
हस्तेनोद्धृत्य कुर्वीत शौचमम्भो जलाशयात् ॥ ४.१.६॥
आगन्धलेपयोर्न्नाशान्निर्विशेषं तदिष्यते ।
सर्वेषामपि वर्णानां विप्रादीनां पुनस्त्वियं ॥ ४.१.७॥
परिपाटिष्यते तत्र भार्गवावनिवासिनां ।
द्वादशाद्वादशावृत्तीन्याहुः शौचानि वै गुदे ॥ ४.१.८॥
सप्तावृत्तीनि सप्ताहुर्ल्लिङ्गे मृत्तिकयासह ।
विप्रस्य पादहीनान्यत्राद्ये क्षत्रियवैश्ययोः ॥ ४.१.९॥
पञ्चावृत्तीनि पञ्चाहुर्द्वितीये चापरे पुनः ।
सूत्रिणस्तानि कुर्युश्च पञ्चावृत्तीनि पञ्च वा ॥ ४.१.१०॥
सप्तावृत्तीनि वा सप्त प्रथमे त्रीण्यनन्तरे ।
त्र्यावृत्तीनि च सर्वेपि क्षालयेयुर्म्मृदम्भसा ॥ ४.१.११॥
एकैकान्तरुभौ हस्तावेष भार्गवदर्शितः ।
शौचक्रमो न कुर्वीत रामभूमावनातुरः ॥ ४.१.१२॥
पात्रस्थेनाम्बुना शौचं नावगाह्य जलेपि वा ।
एतच्छौचं गृहस्थानामथ च ब्रह्मचारिणां ॥ ४.१.१३॥
वनस्थानाञ्च भिक्षूणां तत्तु द्विगुणमिष्यते ।
मूत्रे विसृष्टे गण्डूषैः सप्तभिर्म्मुखशोधनं ॥ ४.१.१४॥
कुर्वीत धृतकौपीनो वर्च्चस्येतैर्द्दशाधिकैः ।
अनिःसृतपुरीषोपि नित्यस्नाने समाचरेत् ॥ ४.१.१५॥
शौचं निःसृतवर्च्चोवत् गण्डूषांश्च द्विजोत्तमः ।
नैष्ठिको दीक्षितश्चाग्निहोत्री सर्वत्र चाप्लवे ॥ ४.१.१६॥
गण्डूषांस्तत्र कुर्वीत मुक्तकौपीन एववा ।
कौपीनधारणं कृत्वा पादौ त्रिश्शोधयेन्मृदा ॥ ४.१.१७॥
सजलेन जलेनैव सकृत् पश्चादपि द्विजः ।
अफेनिलैर्जलैर्द्विराचामेच्चन्तरान्तरा ॥ ४.१.१८॥
निमित्ते सति सर्वेपि प्रकृतिस्थोपपवीतकाः ।
आचामेयुः पवित्रेण माषदद्घ्नेन वारिणा ॥ ४.१.१९॥
हृल्गामिनैव षल्कर्म्मा क्षत्रियः कण्ठगामिना ।
वैश्यस्तालुस्पृशैवान्तर्गतहस्ताः स्युरत्र ते ॥ ४.१.२०॥
सर्वेपि जानुनोः कुर्युरासीनाश्च न चोदके ।
स्वाचान्तो वाग्यतो दन्तान्मार्जयेच्च प्रगेतने ॥ ४.१.२१॥
स्नानकर्म्मणि नैवात्र दक्षिणाभिमुखो भवेत् ।
चूतपत्रेण सर्वेपि कुर्युर्द्दर्शनशोधनं ॥ ४.१.२२॥

अगृहस्थस्तु तेनैव कुर्यात्तद्वच्च दीक्षितः ।
गृहस्थानान्तु सन्दग्द्धतुषाचूर्णोपि सम्मतः ॥ ४.१.२३॥
नैकादश्यां न दर्शे न सङ्क्रान्तौ नार्कभौमयोः ।
वारे गृहस्थः सर्वेपि सङ्क्रमान्तेषु न त्रिषु ॥ ४.१.२४॥
दन्तानाधाव्य कुर्वीत गण्डूषान् षोडशः द्विजः ।
अधौतदन्तो नैव स्यादनिषिद्धेहनि द्विजः ॥ ४.१.२५॥
अपां द्वादशभिर्दन्ता गण्डूषैरितरत्र तु ।
पूताः स्युस्तदनुस्नायी वासो विस्रस्य वर्जयेत् ॥ ४.१.२६॥
कटिसूत्रञ्च कौपीनमार्द्रीकृत्य च धारयेत् ।
पादौ मृद्वार्भिरामृज्याद्विराचामेदनन्तरं ॥ ४.१.२७॥
इति त्रिरम्बुनाप्येतौ केवलेनाथ मार्जयेत् ।
अथाचान्तोवगाह्याप्सु मज्जेत्त्रिरथ शोधयेत् ॥ ४.१.२८॥
अङ्गानि चूडां विस्रस्य बध्नीयाच्चार्द्रितां जलैः ।
सकृन्मङ्क्त्वा जलं त्यक्त्वा तत आचमनं चरेत् ॥ ४.१.२९॥
यथावदथ सम्प्रोक्ष्य वासः प्राङ्मार्जितं जले ।
उद्धृत्य तृस्मदुल्कोच्य वामहस्तप्रकोष्ठके ॥ ४.१.३०॥
क्षिप्त्वा हृदि निधायाथ वामपाणितलं सकृत् ।
मङ्क्त्वा तीरमभिव्रज्य तिष्ठन् पार्ष्णिमिते जले ॥ ४.१.३१॥
प्रकोष्ठाद्वास आदाय तेन कुर्वीत मार्जनं ।
शिरसो मार्जनं सर्वे कुर्वीरन् प्रथमं पुनः ॥ ४.१.३२॥
गृहस्थः पृष्ठवंशस्य ब्रह्मचारी यथामति ।
स्नातकः कर्णयोः कुर्यादक्ष्णोरेव तु मस्करी ॥ ४.१.३३॥
हृदयस्याग्निहोत्री तु कण्ठकूपस्य दीक्षितः ।
स्नातकादय इत्येते तत्तदङ्ग प्रमार्जने ॥ ४.१.३४॥
निर्मृज्यैव पुनर्वासः कुर्युश्शेषाङ्गमार्जनं ।
मार्जने पृष्ठवंशस्य मजयेयुस्तदंशुकं ॥ ४.१.३५॥
सर्वेपि सर्वे चान्यत्र निर्द्दिष्टाः कामचारिणः ।
संवृत्तमार्जनो वस्त्रं निष्पीड्योदकमजितं ॥ ४.१.३६॥
सम्मृष्टबद्धसूत्रस्तत् कौपीनं परिवर्तयेत् ।
शिखाबन्धनतः पूर्वं परं वा पूर्वपक्षिणां ॥ ४.१.३७॥
कार्यः पुनश्शिखाबन्धः पादयोश्चाथ शोधनं ।
सान्तराचमनं सर्वसाधारणमुदाहृतं ॥ ४.१.३८॥
निष्पीड्य परिशोष्याथ कौपीनं वास आक्षिपन् ।
परिदध्याच्च न स्रस्तं प्रागग्रे कारयेच्च तत् ॥ ४.१.३९॥
पादौ यथावत् प्रक्षाल्य पश्चादाचमनं चरेत् ।
केचिदाचमनं मन्त्रैः केचित्तूष्णीञ्च कुर्वते ॥ ४.१.४०॥

ब्राह्मं प्रोक्षणमन्त्रेण वायव्यं रजसा गवां ।
आग्नेयं भस्मना शुद्धमवगाह्याम्बु वारुणं ॥ ४.१.४१॥
चतुर्विधमिति स्नानं ब्राह्मशेषन्तु वारुणं ।
द्विजैरवश्यं कर्तव्यं रामावनिनिवासिभिः ॥ ४.१.४२॥
इति चतुर्थस्याध्यायस्य प्रथमः पादः

अथ द्वितीयःपादः
अथ सन्ध्यामुपासीनः स्वस्वसूत्रानुरोधतः ।
द्विजः प्रातश्च मध्याह्ने दिनस्य विरतावपि ॥ ४.२.१॥
आदिमध्यावसानेषु वासरस्य महर्षिभिः ।
तिस्रः सन्ध्याः समाम्नातास्ताश्चोपास्या द्विजन्मभिः ॥ ४.२.२॥
उपास्येषु द्विजातीनां श्रेष्ठं सन्ध्यात्रयं विदुः ।
यस्य नास्त्यादरस्तत्र द्विजेभ्यस्स बहिष्कृतः ॥ ४.२.३॥
तस्मात् सन्ध्यामुपासीरन् सर्वे चैव द्विजातयः ।
प्रत्यहं श्रद्धया ये तु सन्ध्यात्रयमुपासते ॥ ४.२.४॥
निर्द्धूतपापास्ते यान्ति ब्रह्मलोकं सनातनं ।
तस्मात् सन्ध्यामुपासीरन् सर्वे चैव द्विजातयः ॥ ४.२.५॥
अनृतेन न दुष्येयुर्द्दिवामैथुनतोपि वा ।
ते द्विजा ये यथाकालं सन्ध्यास्तिस्र उपासते ॥ ४.२.६॥
तस्मात् सन्ध्यामुपासीरन् सर्वे चैव द्विजातयः ।
स्वस्वसूत्रानुरोधेन भवेत् पातित्यमन्यथा ॥ ४.२.७॥
साधारणं प्रवक्ष्यामि यत्तत्राधि समासतः ।
असाधारणविज्ञानमाचारादथवागमात् ॥ ४.२.८॥
दृश्यादृश्यर्क्षसंयुक्ता या वेला तु निशात्यये ।
तामेव प्रथमां सन्ध्यां सर्वे कालविदो विदुः ॥ ४.२.९॥
ज्ञात्वा विप्रादयो यत्नादेनां वेलामुपस्थितां ।
प्राचीमभिमुखीकृत्य दद्युरञ्जलिना जलं ॥ ४.२.१०॥
तिष्ठन्तः प्रोच्य गायत्रीं सकृच्चानेकशोपि वा ।
यथाचारं यथासूत्रं क्षिपेयुर्न्न जलात् स्थले ॥ ४.२.११॥
त्रिरेवं विधिवत्कृत्वा परिक्रम्य यथाविधि ।
विदधीरन्नथासीना देवर्षि पितृतर्पणं ॥ ४.२.१२॥
प्रकृतिस्थोपवीताःस्युर्द्देवानां तत्र तर्पणे ।
प्राचीनावीतिनः पित्र्ये स्युरन्यत्र निवीतिनः ॥ ४.२.१३॥
इति सङ्क्षेपतः प्रोक्तस्सन्ध्यासाधारणः क्रमः ।
अम्बुक्षेपादिकं कृत्वा तिष्ठन्तः षत्पदात् बहिः ॥ ४.२.१४॥
आसूर्यस्योदयात् कुर्युर्गायत्र्या विधिवज्जपं ।
सहस्रतममासाद्य ततः कुर्युस्समापनं ॥ ४.२.१५॥

तदर्द्धपरिमाणे वा पूर्णे वाष्टोत्तरे शते ।
प्रणवञ्चैव गायत्रीमष्टवर्णमपि वैष्णवं ॥ ४.२.१६॥
शैवं पञ्चाक्षरञ्चैव जपेन्नित्यमतन्द्रितः ।
ब्रह्मचारी गृहस्थो वा चतुश्शान्तिकमुच्यते ॥ ४.२.१७॥
एतच्चतुष्कमित्याह भगवान् भार्गवो मुनिः ।
यन्नित्यमर्घ्यदानञ्च गायत्र्याश्च मनोर्जरः ॥ ४.२.१८॥
ताभ्यामन्यद्विना पुण्ड्रं नैव कुर्युर्द्विजातयः ।
प्रत्यहञ्च त्रिपुण्ड्रस्य धारणं हि द्विजन्मनां ॥ ४.२.१९॥
दक्षिणे भार्गवक्षेत्रे नियतं भार्गवोब्रवीत् ।
ऊर्द्ध्वपुण्ड्रं त्रिपुण्ड्रञ्चसमुच्चीय च कुत्रचित् ॥ ४.२.२०॥
विकल्पेन च तत् कुर्युर्यथाकुलमिह द्विजाः ।
नित्यं यदर्घ्यदानादि कामतःपुण्ड्रधारणे ॥ ४.२.२१॥
प्रवृत्तिर्वा निवृत्तिर्वा तत्र भार्गवदर्शनात् ।
केवलं तूर्द्ध्वपुण्ड्रं यत्तन्न कार्यमिह द्विजैः ॥ ४.२.२२॥
ऊर्द्ध्वपुण्ड्रं द्विजा एव कुर्वीरन् गोपिकामृदा ।
त्रिपुण्ड्रसाधनान्याहुर्भूतिर्भसितभस्मनी ॥ ४.२.२३॥
क्षारो रक्षा च पञ्चेति तद्विशेषाभिधीयते ।
कपिलायाःपुरीषेण जाता भूतिरिति स्मृता ॥ ४.२.२४॥
कृष्णाया गोः पुरीषेण जातन्तु भसितं विदुः ।
भस्म लोहितवर्णायाः श्वेतायाः क्षार उच्यते ॥ ४.२.२५॥
नानारूपवती गौर्या तस्य रक्षेति कीर्त्यते ।
ऐश्वर्यकारणं भूतिर्भासकं भसितं मतं ॥ ४.२.२६॥
सर्वाघभक्षकं भस्म येन क्षरणमापदां ।
विदधाति ततः प्राहुः क्षारं रक्षेति रक्षणात् ॥ ४.२.२७॥
भूतप्रेतपिशाचादिदुर्ग्रहेभ्यो भयादपि ।
लोके साधारणं भस्मशब्दो निर्द्दग्द्धवस्तुषु ॥ ४.२.२८॥
वर्तते प्रथितस्तस्मात्त्रिपुण्ड्रं भस्मना चरेत् ।
अविधानकृतं भस्म नैव धार्यं द्विजन्मभिः ॥ ४.२.२९॥
उत्पाद्य विधिवत् भस्म प्रत्यहं धारयेत् गृही ।
स्वाध्यायाद्यखिलं कर्म्म कृत्वाघेभ्यो विमुच्यते ॥ ४.२.३०॥
तथैव ब्रह्मचारी च वनस्थश्चाप्यसंशयं ।
विधिवत् भस्म निष्पाद्य गृहस्थस्सम्प्रतीतधीः ॥ ४.२.३१॥
याचितोयाचितो वापि व्रतस्थेभ्यो दिशेच्च तत् ।
आग्नीषोमात्मकं भस्म विश्वमेतच्च तादृशं ॥ ४.२.३२॥
भस्मदानफलं तस्मात् कः परिच्छेत्तुमर्हति ।
भिक्षुभ्यश्च वनस्थेभ्यो ब्रह्मचारिभ्य एव च ॥ ४.२.३३॥

त्रिभ्यो गृहस्थो दद्यात्तदेष धर्मस्सनातनः ।
न हस्ते निक्षिपेत् भस्म न हस्तेनाददीत च ॥ ४.२.३४॥
पात्रेण सह दातव्यमादातव्यं तथैव तत् ।
यो दत्ते केवलं भस्म पाणौ यः स्वीकरोति च ॥ ४.२.३५॥
तयोरग्निश्च सोमश्च तपो हरति सञ्चितं ।
आधाय कदलीपत्रे जलकुण्डिकया सह ॥ ४.२.३६॥
स्नातागतेभ्यो विप्रेभ्यो निदधीत पुरो गृही ।
तदल्पायासमप्राज्यव्ययसाद्ध्यं महाफलं ॥ ४.२.३७॥
कृत्वा यशस्समाप्नोति गृह्यघेभ्यश्च मुच्यते
इति चतुर्थस्याध्यायस्य द्वितीयःपादः

अथ तृतीयः पादः
आख्यास्ये भस्मनिर्म्माणविधिमत्र समासतः ।
येनैव निर्म्मितं भस्म द्विजानां श्रेयसे भवेत् ॥ ४.३.१॥
अशिवैस्सहितामङ्कैर्विटास्यां महाखलां ।
भ्रमच्चित्तां पुनर्द्धेनुं कृशाङ्गां मलिनाकृतिं ॥ ४.३.२॥
मृतवत्सामशस्ताङ्गां रोगार्तां मलिनेन्द्रियां ।
अदुग्द्धदोहिनीं नूत्नप्रसवामपराशिनीं ॥ ४.३.३॥
दग्द्धगात्राञ्च वन्ध्याञ्च केशचेलास्थिभक्षिणीं ।
विहाय कपिलामादौ गोमयार्थे गवेषयेत् ॥ ४.३.४॥
श्वेतां वा तादृशीमन्यास्तदलाभेनु तादृशीः ।
कस्याञ्चित्तासु सिद्धायां तामानीय गृहान्तिके ॥ ४.३.५॥
गोष्ठे निवेश्य सौहित्यं वर्तयन् परिपालयेत् ।
अथोषसि चतुर्द्दश्यां तिथौ स्नात्वा समाहितः ॥ ४.३.६॥
धौतवस्त्रोग्रतः पश्येद्दूर्वा मरतकोपमाः ।
अजन्तुदहनोच्छिष्टास्सहाग्रा मेध्यभूरुहः ॥ ४.३.७॥
सहस्रपरमेत्यादिमन्त्रेणादाय तास्ततः ।
नीत्वान्तिकमपश्चाथ गां स्पृशन्नभिमन्त्रयेत् ॥ ४.३.८॥
आगाव इत्यमुं मन्त्रमथ दूर्वास्समाशयेत् ।
तूष्णीं गावो भगो गा न इति मन्त्रेण चोदकं ॥ ४.३.९॥
उपोष्य तदहः स्नात्वा परेहनि समाहितः ।
धौतवस्त्रस्समासाद्य सहोपकरणश्शुचिः ॥ ४.३.१०॥
उत्थाप्य गामहिंस्रस्सन् गायत्र्या मूत्रमाहरेत् ।
कलशे काञ्चने रूप्यमये ताम्रमयेपि वा ॥ ४.३.११॥
अथवा मृण्मये पात्रे गृह्णीयात् पौष्करेपिवा ।
भूमौ निपतनात् पूर्वं गन्धद्वारमितीरयन् ॥ ४.३.१२॥
गृह्णीयात् गोमयं गेही पतितं वा स्थले शुचौ ।

त्रिर्म्मे भजत्विति प्रोच्य गोमयं शोधयेत् पुनः ॥ ४.३.१३॥
अत्यक्ष्मीरिति मन्त्रेण तस्माद्धान्यादि चोद्धरेत् ।
मूत्रं तत्र क्षिपेत् सन्त्वा सिञ्चामीत्यमुना ततः ॥ ४.३.१४॥
पञ्चानामित्यनेनाथ पिण्डान् कुर्याच्चतुर्द्दश ।
शुचौ देशे शुनाधृष्ये शोषणायार्करश्मिषु ॥ ४.३.१५॥
तान्निधायाथ भुञ्जीत सुवृत्तेषु स्वकर्म्मसु ।
पात्रेषु कुत्रचित् पूर्वमुदितेषु निधाय तान् ॥ ४.३.१६॥
शुष्कान् रक्षेच्छुचौ देशे यावत्संशोषणं भवेत् ।
अथैकां रजनीं नीत्वा तथैवान्येद्युरुत्थितः ॥ ४.३.१७॥
स्नानाद्यवश्यकं कृत्वा स्वगृह्योक्तेन वर्त्मना ।
प्रतिष्ठाप्याग्निमत्रैतान् जुहुयाच्च यथाक्रमं ॥ ४.३.१८॥
आदौ तु प्रणवेनैकं जुहुयादक्षरैःपुनः ।
षडक्षरस्य तस्यैव व्यावृत्तस्याक्षरैःपुनः ॥ ४.३.१९॥
प्रपदेनैकमेभिस्तु स्वाहान्तैर्हुतिरिष्यते ।
सावर्णदेवायाघारावाज्यभागौ ततःपरं ॥ ४.३.२०॥
ततो व्याहृतिभिः पश्चाद्विंशतिस्तु त्रयाधिका ।
निधानपतये पञ्च पञ्च ब्रह्मपरास्ततः ॥ ४.३.२१॥
मनुर्न्नमोहिरण्येति क्रमादेता हुतीश्चरेत् ।
अथर्तसत्यमित्येका कद्रदायेति चापरं ॥ ४.३.२२॥
यस्य वैकङ्कतीत्यन्या इति तिस्रो हुतीश्चरेत् ।
अनाज्ञातत्रयं पञ्च व्याहृत्या च ततःपरं ॥ ४.३.२३॥
इति क्रमेण हुत्वातःपरं स्विष्टकृतं यजेत् ।
इद्धमशेषञ्च निर्वर्त्य पूर्णपात्रजलं पुनः ॥ ४.३.२४॥
बृंहयेत् पूर्णमस्यादियजुषान्यजलेन तत् ।
क्षिपेत्तदनु मूर्द्धिर्न ब्राह्मणेष्वमृतमित्यपि ॥ ४.३.२५॥
दिक्षु तोयं विनिक्षिप्य ब्रह्मणे दक्षिणां ततः ।
दत्वा पुलकमानेतुकाम एवमुदीरयेत् ॥ ४.३.२६॥
आहरिष्यामि देवानां सर्वेषां कर्म्मगुप्तये ।
जातवेदसमेनं त्वां पुलके छादयाम्यहं ॥ ४.३.२७॥
ततःपुलकमानीय छादयेत्तेन चानलं ।
ब्रह्माणं स विसृज्याथ स्वयं भुञ्जीत वाग्यतः ॥ ४.३.२८॥
चतुर्थस्याध्यायस्य तृतीयःपादः

अथ चतुर्थः पादः
अथाहनि तृतीये वा चतुर्थे वा कृताप्लवः ।
शुक्लयज्ञोपवीती सन् सितवासास्त्रिपुण्ड्रभृत् ॥ ४.४.१॥
समभ्युपविशन् भस्मकुण्डं कृत्वा पुरस्ततः ।

ओन्तल्ब्रह्मेति सञ्ज्ञप्य सन्त्यजेत् भस्मपौलकं ॥ ४.४.२॥
अथोपचारान् कुर्वीत व्याहृत्यावाहनादिकान् ।
षोडशापि क्रमेणैव ततोग्निमुपसंहरेत् ॥ ४.४.३॥
अग्नेर्भस्मेत्यनेनाथ गृह्णीयात् भस्म चेतरत् ।
मूत्रेण कपिलाया वाथवा गन्धोदकेन वा ॥ ४.४.४॥
अग्निरित्यादिमन्त्रेण तच्छोधनमथाचरेत् ।
प्रायो जलांशं सन्त्यज्य चन्दनोशीरकुङ्कुमैः ॥ ४.४.५॥
अगरुत्रितयोपेतान्मेलयेच्छ्लक्ष्णचूर्णितैः ।
घनसाररजोभिश्च वटकीकरणक्षमे ॥ ४.४.६॥
जाते तस्मिन् विदध्याच्च वटकांसेतेन वर्तुलान् ।
चूर्णानां मेलने मन्त्रं प्रणवञ्चाभ्युदीरयेत् ॥ ४.४.७॥
अणोरणीयानित्यादि वटकीकरणेपि च ।
संशोध्य किरणैर्भानोस्सल्पात्रे स्थापयेच्च तान् ॥ ४.४.८॥
एवं भस्म समुल्पाद्य त्रिपुण्ड्रं तेन धारयेत् ।
गृहस्थः प्रत्यहं प्रातःस्नात्वान्ये च यथाविधि ॥ ४.४.९॥
एष निष्कारणो धर्म्मो ब्रह्मक्षत्रविशां मतः ।
निष्प्रयासो बहुफलस्संसारोन्मूलनक्षमः ॥ ४.४.१०॥
अभावे संस्कृतस्यैव शुष्कगोमयमात्रजं ।
यथावत् संस्कृतं ग्राह्यं त्रिपुण्ड्रार्थं द्विजन्मभिः ॥ ४.४.११॥
तस्याप्यभावे तत् ग्राह्यं गोमयोत्थमसंस्कृतं ।
शिवालयस्थं यत्तद्वा विप्रादीनामयं विधिः ॥ ४.४.१२॥
शूद्राणां श्रोत्रियागारपचनाग्निसमुत्भवं ।
त्रिपुण्ड्रधारणे शस्तमन्यत् भस्म तु नेष्यते ॥ ४.४.१३॥
सर्वेषां च त्रिपुण्ड्रेन धार्यमाणेन सर्वदा ।
महापापानि नश्यन्ति संसारश्च निवर्तते ॥ ४.४.१४॥
त्रिपुण्ड्रेन विना ध्यानं त्रिपुण्ड्रेन विना जपः ।
त्रिपुण्ड्रेन विना होमस्त्रिपुण्ड्रेन विना बलिः ॥ ४.४.१५॥
त्रिपुण्ड्रेन विना दानं पञ्चैतानि भृगूद्वहः ।
दक्षिणे भार्गवक्षेत्रे वर्जयेदिति चाब्रवीत् ॥ ४.४.१६॥
शिखां दायमथाचारं सूत्रं पुण्ड्रञ्च पञ्चकं ।
पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत् ॥ ४.४.१७॥
स्नात्वाचम्य प्रदायार्घ्यं यथावद्वेदमातरं ।
सावित्रीं विधिवज्जप्त्वा स्वाध्यायमनुवर्तयेत् ॥ ४.४.१८॥
होमञ्च प्रत्यहं कुर्यादातिथेयो गृहाश्रमी ।
अतिथिं वैश्वदेवान्ते विजानीयादुपस्थितं ॥ ४.४.१९॥
न पूर्वमागतं कञ्चित्तञ्च शक्तयानुपूजयेत् ।

अथ माध्याह्निकं कर्म्म कृत्वातिथिपुरस्सरः ॥ ४.४.२०॥
अशिष्टकृत्य आत्मानं हुतशिष्टेन धारयेत् ।
अह्नस्सकृत् सकृद्रात्रेर्द्विजस्याशनमिष्यते ॥ ४.४.२१॥
नान्तरं भोजनं कार्यं न तु पक्षान्तयोर्न्निशि ।
वाग्यमे कामचारित्वमशने गृहमेधिनां ॥ ४.४.२२॥
स्नातकानाञ्च सर्वेषां भार्गवस्सममन्यत ।
आशौचे लवणं वर्ज्यं पिण्डदानां विशेषतः ॥ ४.४.२३॥
प्रत्यक्षलवणं वर्ज्यं बृहद् व्रतधरैर्द्विजैः ।
अनुच्छिष्टे तु निक्षिप्तं पत्रे तत् गृहमेधिनः ॥ ४.४.२४॥
न स्पृशेयुस्त्यजेयुस्तत्सहपत्रं महाव्रताः ।
अद्यादष्टौ यतिग्रासान् वानप्रस्थस्तु षोडश ॥ ४.४.२५॥
द्वात्रिंशत् गृहमेधी तान् यथेष्टं ब्रह्मचारिणः ।
अन्त्याम्बुपानादूद्ध्वर्न्तु पत्रस्पर्शे द्विजोत्तमः ॥ ४.४.२६॥
स्नायात्सचेलमेवायं यस्य त्वग्नित्रयं गृहे ।
अभक्ष्याण्यपि वक्ष्यन्ते तानि यत्नेन वर्जयेत् ॥ ४.४.२७॥
अबुध्या पतिते तेषां भक्षणे निष्कृतिं चरेत् ।
जपेत् सहस्रं नामानि वैष्णवान्येव चान्वहं ॥ ४.४.२८॥
शृणुयाच्च पुराणन्तु वैष्णवं शैवमेव वा ।
श्रावयेच्च यथाशक्ति नित्यं प्रवयसो गुरून् ॥ ४.४.२९॥
अतिथीन् सुहृदश्चापि ये नामेच्छन्ति तानपि ।
वेदस्याध्यापनं कुर्याद्यथाकालञ्च सम्भवे ॥ ४.४.३०॥
नानध्याये न शूद्रेषु शृण्वत्स्वपि कदाचन ।
विरमय्याखिलं कर्म्म प्रदोषात् प्राग्यथोचितं ॥ ४.४.३१॥
सार्कां सायन्तनीं सन्ध्यां समाराध्य यथाविधि ।
आसीनः प्रजपेच्छक्त्या गायत्रीं प्रयतो द्विजः ॥ ४.४.३२॥
अथान्यच्च यथाचारं कृतकृत्यस्तु भोजनं ।
शयनञ्चेति सङ्क्षेपादाचारो गृहमेधिनां ॥ ४.४.३३॥
दर्शितो यदनुष्ठानात् गृही न स्खलति क्वचित्
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
चतुर्थस्याध्यायस्य चतुर्थः पादः
चतुर्थोध्यायः समाप्तः ॥ ४॥

पञ्चमाध्यायः
प्रथमःपादः
आत्मानमनृणीकर्तुं पितृणामाश्रयाशनां ।
साक्षीकृत्य कृतं कर्म्म स्मरन् दारेष्वकामुकः ॥ ५.१.१॥
वर्तेतर्तौ न जन्मर्क्षे नैकादश्ययां न पर्वणि ।

न षष्ठ्यां न च सङ्क्रान्तौ न वारेर्कस्य नाहनि ॥ ५.१.२॥
श्राद्धं करिष्यन् पूर्वेद्युः श्राद्धं कृत्वा च तद्दिने ।
पुत्रार्थमपि नो गच्छेद्दीक्षितश्च न दीक्षितां ॥ ५.१.३॥
नाप्रीयमाणां नाकामां न तथैवामयाविनीं ।
न व्रतस्थां वधूं गच्छेत् त्यजेदेव पराङ्गनाः ॥ ५.१.४॥
ज्ञात्वा कामवतीं भार्यां शास्त्रस्याप्यनतिक्रमं ।
स्त्रीणां स्मरन् वरञ्चैन्द्रं चरेत् कामं स्वयोषति ॥ ५.१.५॥
आश्लेषे वक्त्रसंयोगे वदनग्रहणेपि च ।
विपरीतरतौ चास्याः कामेनायन्त्रणो भवेत् ॥ ५.१.६॥
यां यां कामकलां पश्येत् प्रबुद्धां समुपक्रमैः ।
तां तां निमीलयेद्बुध्वाः स्वयं नान्याःप्रबोधयेत् ॥ ५.१.७॥
पावकस्य वरान्मेध्या योषितस्तद्रतौ गृही ।
कामेन स्वेषु दारेषु प्रवृत्तो नापराध्यति ॥ ५.१.८॥
नीचसौरतसल्लापांस्तिरश्चाञ्च विडम्बनं ।
वर्जयेतामुभौ तत्र काकलीलाविडम्बनं ॥ ५.१.९॥
शयनादुत्थिता नारी शुचिरेवाशुचिःपुमान् ।
तस्मात् स्नात्वैव संवेशं कुर्याच्च कृतसङ्गमः ॥ ५.१.१०॥
असकृद्यःस्त्रियं गच्छेदेकस्यां निशि लोलुपः ।
अस्वर्ग्यं तस्य तत् कर्म्म हरति ब्रह्मवर्च्चसं ॥ ५.१.११॥
ऋतावगच्छतो दाराननृतावपि गच्छतः ।
उभयोर्न्नरके वासो भवति भ्रूणहत्यया ॥ ५.१.१२॥
पुष्पोत्भेदत आरभ्य दिवसानि तु षोडश ।
ऋतुकालं विदुस्तत्र त्रीणि पूर्वामि वर्जयेत् ॥ ५.१.१३॥
ऋतावृतौ निषेकाख्यं कर्म्म मन्त्रेण केचन ।
इच्छन्ति भार्गवक्षेत्रे निषेको मन्त्रतस्सकृत् ॥ ५.१.१४॥
प्रत्यपत्यं स आधत्ते स्वगुणोनोपलम्भनं ।
सकृत्करणमात्रेण सीमन्तोन्नयनं यथा ॥ ५.१.१५॥
इति भार्गव आशास्ते स निषेकः पुरोदितः ।
उत्पत्स्य मानस्याद्योयं संस्कारःकथितो बुधैः ॥ ५.१.१६॥
आहुर्द्वितीयं संस्कारं कर्म्म पुंसवनाह्वयं ।
तृतीयमथ सीमन्तं चतुर्थं जातकर्म्म च ॥ ५.१.१७॥
पञ्चमं नामकरणं षष्ठं निष्क्रामणं विदुः ।
प्राशनं सप्तमं चूडाकर्म्म त्वाचक्षतेष्टमं ॥ ५.१.१८॥
नवमं कर्णयोर्वेधं दशमन्तूपनायनं ।
एकादशं समारम्भमाम्नायस्य प्रचक्षते ॥ ५.१.१९॥
केशान्तं द्वादशं प्राहुः स्नानञ्चापि त्रयोदशं ।

चतुर्द्दशमथोद्वाहमाहुः पञ्चदशं पुनः ॥ ५.१.२०॥
परिग्रहं विवाहाग्नेरथ त्रेताग्निसङ्ग्रहं ।
संस्कारं षोडशं प्राहुस्तेमी षोडश मन्त्रतः ॥ ५.१.२१॥
विप्रक्षत्रियवैश्यानां शूद्रस्यामन्त्रतो न वा ।
कर्णवेधान्तिमास्तेषु विवाहश्च तथाविधः ॥ ५.१.२२॥
अत्र तूत्तमविप्राणामेव पूर्णतया इमे ।
त्रेताग्निसङ्ग्रहार्हाणामन्येषां ह्रास इष्यते ॥ ५.१.२३॥
जातकर्म्मादयः स्त्रीणां कर्तव्या मन्त्रतो विना ।
कर्णवेधान्तिमास्तासामुद्वाहो मन्त्रपूर्वकः ॥ ५.१.२४॥
एक एव हि संस्कारो नान्यः कश्चिदिहेष्यते ।
सुमुहूर्तेषु संस्कारान् विदधीत यथाक्रमं ॥ ५.१.२५॥
सर्वे सर्वान् लमग्रैस्तैर्यथाकालमनुष्ठितैः ।
सर्वे क्षेमकृतं यान्ति पन्थानमकुतोभयं ॥ ५.१.२६॥
अमन्त्रं वा समन्त्रं वा संस्कारं स्वकुलोचितं ।
अकुर्वन् महदाप्नोति किल्बिषं भार्गवक्षितौ ॥ ५.१.२७॥
इति पञ्चमस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
अन्तर्वत्नीं विदित्वाथ कुर्यात् पुंसवनं वधूं ।
आधानतस्तृतीये तु मासे नोत्तरयोर्द्वयोः ॥ ५.२.१॥
आधानदिवसाज्ञाने दिवसैः पञ्चमादिभिः ।
पुष्पोत्भेददिनान्मासि तुर्ये वा प्रथमग्रहे ॥ ५.२.२॥
पुंसवानन्तरं मासि तुर्ये सीमन्त इष्यते ।
न पञ्चमे स केषाञ्चित् सम्मतस्सप्तमादिषु ॥ ५.२.३॥
सीमन्तं प्रथमे गर्भे प्रतिगर्भं तदत्यये ।
आद्यप्रजायाः सूतेः प्राङ्मरणेपि तदिष्यते ॥ ५.२.४॥
संस्कारो विष्णुबल्याख्यः केषाञ्चिन्मासि चाष्टमे ।
जाते तु जातकर्म्म प्राङ्नाभिनालस्य वर्द्धनात् ॥ ५.२.५॥
प्रागेव स्तन्यपानाच्च कालोत्र परमो मतः ।
तत्र त्वकरणे कार्यमाशौचापगमात् परं ॥ ५.२.६॥
एकादशे दिने नाम कुर्याद्द्वादश एव वा ।
अन्त्यत्र्यंशे दशम्याश्च निशायाः कैश्चिदिष्यते ॥ ५.२.७॥
तैरप्यत्र तदा नाम न कर्तव्यमिति स्थितिः ।
आशौचापगमान्न प्रागिति भार्गवशासनात् ॥ ५.२.८॥
नाम्नः प्रागेव पश्चाद्वा वर्तयेच्च शुभे दिने ।
यथाकुलं वचाप्राशनाञ्जनादीरपि क्रियाः ॥ ५.२.९॥
निष्क्रामणं चतुर्थे तु मासेन्नप्राशनेन वा ।

अन्नप्राशन्तु षष्ठेस्मिन् सावनेन तदुत्तमं ॥ ५.२.१०॥
सौरेण मध्यमं प्रोक्तं चान्द्रेण त्वापदीष्यते ।
वपनन्तु तृतीयेब्दे पञ्चमे वा द्विजन्मनां ॥ ५.२.११॥
अक्षरारम्भणञ्चेष्टमनयोरेव चाब्दयोः ।
वपनानन्तरं कुर्यात् कर्णवेधं द्विजन्मनां ॥ ५.२.१२॥
ओजेब्दे न ततः पूर्वमत्र भार्गवशासनात् ।
उपनीतेः पुरैवोक्तः कालोत्र तदनन्तरः ॥ ५.२.१३॥
उपाकर्म्मण्यतीते तु पुनस्त्यक्त्वा दिनत्रयं ।
कार्यश्च विहिते काले ज्योतिश्शास्त्रानुसारतः ॥ ५.२.१४॥
तथा व्रतग्रहञ्चैव यथाकालं समाचरेत् ।
शुक्रियव्रतमध्ये तु पर्वाष्टम्योस्समागमे ॥ ५.२.१५॥
कृत्वा बौधायनस्नानं तद्दिनन्तूपवासयेत् ।
केशान्तस्नानयोः कालस्तत्तत्गृह्यानुरोधतः ॥ ५.२.१६॥
स्नातव्यस्नानशेषत्वादुद्वाहे पुनरैच्छिकः ।
स्त्रीणामुपनयनस्थाने विवाहस्तु समन्त्रकः ॥ ५.२.१७॥
उत्तमो द्वादशाब्देयमत ऊर्द्ध्वं न निन्द्यते ।
ऋतुमत्या विवाहस्तु श्रुतिस्मृति निराकृतः ॥ ५.२.१८॥
अतस्तद्दर्शनात् पूर्वमुद्वाहस्सर्वसम्मतः ।
बाहुल्यात् कन्यकानान्तु भार्गवेण कृपालुना ॥ ५.२.१९॥
ओमित्यङ्गीकृतः सोयमापद्धर्म्मो न तूत्तमः ।
नैर्द्धन्ये तु स्वयं भिक्षामटन् निर्ल्लज्जवच्चरन् ॥ ५.२.२०॥
द्वितीयां वा तृतीयां वा स्वयं विनिमयं स्त्रियं ।
अकृत्यमन्यत् कृत्वा वा विक्रीणन् वासमन्दिरं ॥ ५.२.२१॥
यथाकथञ्चित्समये तनयां विनियोजयेत् ।
कुलशीलगुणाढ्येन पतिना मतिमान् पिता ॥ ५.२.२२॥
त्रेताग्निसङ्ग्रहे कालमाम्नायादवधार्यतां ।
इति केचन संस्काराः सह कालैः प्रदर्शिताः ॥ ५.२.२३॥
यद्यन्निषिद्धमेतेषु यद्यदावश्यकं भवेत् ।
उभयन्तद्विजानीयुस्सर्वे मौहूर्तिकागमात् ॥ ५.२.२४॥
इति पञ्चमस्याध्यायस्य द्वितीयः पादः

अथ तृतीयःपादः
एवं निर्दिष्टकालेषु कुर्यात् पुंसवनादिकाः ।
क्रियाः पुत्रस्य निर्दिष्टा विना स्नानं प्रयत्नतः ॥ ५.३.१॥
स्नानञ्च स्नातुकामस्य नात्र निर्बन्धमाचरेत् ।
नैष्ठिको यावदायुःस्यामिति चेत्तस्य तु स्पृहं ॥ ५.३.२॥
तथा सति यथाकालं स्नानं निर्वर्तयेत च ।

वोढुकामस्य चोद्वाहं कारयेच्च बहुप्रजः ॥ ५.३.३॥
सहोदराणां सर्वेषां विवाहोनुमतो मुनेः ।
तथापि तत्र निर्बन्धं यथान्ये न तथाकरोत् ॥ ५.३.४॥
स्युरेवैकस्य पुत्रेण पुत्रवन्तस्सहोदराः ।
अविभक्ता विभागस्तु नेष्यते भार्गवक्षितौ ॥ ५.३.५॥
यदि सौभ्रात्रमेतेषां यदिवा कामकामना ।
कुलसन्तानवृद्ध्यर्थं विवाहस्समनुत्तमः ॥ ५.३.६॥
कालेनूढः स्वयं कामविजितः स्वेच्छया चरन् ।
उन्मत्तवृषवद्वेश्यालम्पटो नष्टचेतनः ॥ ५.३.७॥
हीनस्नानजपाचारःसतां गर्हितचेष्टितः ।
भ्रष्टश्चोभयतोनर्थजन्मा स्वकुलपांसनः ॥ ५.३.८॥
स्वपितॄन्निरये घोरे पातयेन्नात्र संशयः ।
अतो विवाहस्सर्वेषामिष्टः कल्पोयमुत्तमः ॥ ५.३.९॥
अकृत्वा स्वयमाधानमाहिताग्निं न कारयेत् ।
अवश्यञ्च भवेदग्न्याहितो निलयमीयिवान् ॥ ५.३.१०॥
जुहुयाच्चाग्निहोत्रेण यावज्जीवितमतन्द्रितः ।
कुर्वीत चाद्ध्वरं शक्त्या मेषालम्भी द्विजोत्तमः ॥ ५.३.११॥
इष्टिस्सौत्रामणिर्म्मर्त्यगवाश्वपशुरद्ध्वरः ।
नैष्ठिकब्रह्मचर्यञ्च पञ्च द्वेष्टि भृगूद्वहः ॥ ५.३.१२॥
इष्टापूर्ते तु यत्नेन कर्तव्ये गृहमेधिना ।
इष्टेन प्राप्नुयात् स्वर्गं पूर्तं मोक्षस्य पद्धतिः ॥ ५.३.१३॥
अग्निहोत्रं तपस्सत्यमाम्नायस्यानुपालनं ।
आतित्थ्यं वैश्वदेवञ्चापीष्टमित्यभिधीयते ॥ ५.३.१४॥
पूर्तं सरस्तटाकादिविधानं यच्च गोहितं ।
पथिकेभ्योहितञ्चान्यद्देवतायतनक्रियाः ॥ ५.३.१५॥
एकाहमपि भूमिस्थं कुर्वीत तदलं जलं ।
तारणे सप्तकुल्यानां गौस्त्यप्ता तस्य चेत् भवेत् ॥ ५.३.१६॥
जेतव्या भूमिदानेन ये ये लोकाः सतां मताः ।
ये ये गवां प्रदानाच्च तांस्तान् लोकानवाप्नुयात् ॥ ५.३.१७॥
कृत्वा गृहस्थः पान्थानां विश्रान्त्यै दुर्गमाद्ध्वनि ।
क्रोशमेकं विशालानां पादपानां प्ररोपणं ॥ ५.३.१८॥
वापीकूपतटाकानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स प्रेत्य परमं पदं ॥ ५.३.१९॥
प्राप्नुयान्न च जायेत पुनर्भूमौ न संशयः ।
प्रशमय्याशनायाञ्च पथिकानां दिने दिने ॥ ५.३.२०॥
क्षुधाबाधा तु सर्वेषां दुस्सहा च समा मता ।

आविप्रमाचण्डालं वा न वै वैषम्यमिष्यते ॥ ५.३.२१॥
ततश्शक्त्यनुरोधेन दद्यादन्नं गृहस्थाश्रमी ।
क्षुधातुराणां सर्वेषां श्राणां पानीयमेव वा ॥ ५.३.२२॥
शूद्रोपि पूर्तधर्म्मेण वैदिकेप्यधिकारवान् ।
दानैश्च सर्वैर्दातव्यं दानधर्म्मो नृणां वरः ॥ ५.३.२३॥
सहस्री तु शतं दद्याच्छती दद्यान्नरो दश ।
दद्याच्च दशमी चैकं सर्वे तुल्यफलाः स्मृताः ॥ ५.३.२४॥
विभवे सति दानानि विविधान्याचरेद्विजः ।
अकृत्वाफलसङ्कल्पं षल्कर्म्मा बाहुजः पुनः ॥ ५.३.२५॥
कामेन कामानाप्नोति विहितैरूरुजोपि तैः ।
सर्वे मोक्षाय निष्कामं प्रभवेयुश्च तैः कृतैः ॥ ५.३.२६॥
मुनिः काम्यानि न द्वेष्टि कर्म्माण्यप्यग्रजन्मनां ।
किं त्वत्र फलसङ्कल्पमतस्तत् परिवर्जयेत् ॥ ५.३.२७॥
इति पञ्चमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
सर्वेषामपि देयानां प्रतिग्राही द्विजोत्तमः ।
ब्रह्मणा कल्पितः पूर्वं नान्यसूत्राधिकारवान् ॥ ५.४.१॥
केषाञ्चिन्न निषिद्धश्च विशेषज्ञैः प्रतिग्रहः ।
आत्यन्तिकपरत्वेन तन्निषेधस्य जायते ॥ ५.४.२॥
तत्तद्दानकथोच्छित्तिरर्थाभावश्च धर्मतः ।
तत्तद्दानविधेरन्यथा प्रमाणञ्च तन्मुनिः ॥ ५.४.३॥
भार्गवो भगवान् वीक्ष्य दुष्प्रतिग्रहजैनसां ।
प्राह दानानि शान्त्यर्थं वक्ष्यन्ते तान्यनुक्रमात् ॥ ५.४.४॥
स्वधर्मस्थेन सर्वेषां गृहस्थेन प्रतिग्रहः ।
कार्यो नान्येन केनापि तस्यैतदघमर्षणं ॥ ५.४.५॥
चैत्रे मास्यातपत्राणी शुक्लायां प्रतिपत्तिथौ ।
दद्यात् कुटुम्बिविप्रेभ्यो निषिद्धस्य प्रतिग्रही ॥ ५.४.६॥
उपानहौ च वैशाखे कौशेयं क्षौममेव वा ।
तृणशय्यां तथा शुक्रे वितरेद्व्यजनानि वा ॥ ५.४.७॥
शुचावुदककुम्भञ्च दधि वा क्षीरमेव वा ।
सर्पिर्वा मुल्गगोधूमषष्टिकानथवा यवान् ॥ ५.४.८॥
अहते वाससी दद्याच्छ्रावणे तिलसर्पिषी ।
अन्नं वा ब्रह्मचारिभ्यो यथेष्टं क्षीरसंस्कृतं ॥ ५.४.९॥
मासि प्रोष्ठपदे दद्यान्मकरौ रूप्यनिर्म्मितौ ।
अश्वमाश्विनमासे तु सौवर्णं रौप्यमेव वा ॥ ५.४.१०॥
कार्तिके कपिलां धेनुमजां वा वितरेत् सीतां ।

वत्सेन सह तत्राद्यां द्वितीयामधःकृतां ॥ ५.४.११॥
पञ्चभ्यो ब्रह्मचारिभ्यो मुनिभ्यस्त्रिभ्य एव वा ।
अजिनं कृष्णसारस्य प्रयच्छेन्मार्गशीर्षके ॥ ५.४.१२॥
पौषे तु तिलपत्मानि माघे रजतमेखलां ।
व्रतस्थाय तु पालाशं दण्डं वा राजतं दिशेत् ॥ ५.४.१३॥
फाल्गुने द्विमुखीं धेनुं दद्यात् षल्भिः पदैर्युतां ।
तदलाभे सुवर्णेन रजतेन च साधितां ॥ ५.४.१४॥
इति द्वादश दानानि तत्तन्मासाद्यवासरे ।
भार्गवेण गृहस्थार्थे विहितानि समीक्षया ॥ ५.४.१५॥
दुष्प्रतिग्रहजं पापं तैर्विलुम्पेत् गृहाश्रमी ।
नैकमेकतमेनैकमनेकं वा तदंहसः ॥ ५.४.१६॥
प्रशमे कल्पते तेषामङ्गाङ्गित्वनिबन्धनात् ।
प्राणायामेन गायत्र्यास्सहस्रावर्तनेन च ॥ ५.४.१७॥
अनुवाकं जपन् रौद्रं पूयते दिवसैस्त्रिभिः ।
प्रतिग्राह्य निषिद्धातममुपोष्य तदुहः शुचिः ॥ ५.४.१८॥
स्नातकश्चेदिति प्राहुभृगुकश्यपकाश्यपाः ।
इदमेव गहस्थानामपि साधारणं मुनिः ॥ ५.४.१९॥
मन्यते भार्गवस्तत्र वर्तेत च विकल्पतः ।
एवं वै वर्तमानस्तु गृहमेधी द्विजोत्तमः ॥ ५.४.२०॥
दुष्प्रतिग्रहजं दोषं हित्वाग्निरिव दीप्यते
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
पञ्चमस्याध्यायस्य चतुर्थः पादः
पञ्चमोध्यायः समाप्तः ॥ ५॥

अथ षष्ठाध्यायः
प्रथमः पादः
पञ्च सूना गृहस्थस्य चुल्लीपेषणिकादयः ।
कुर्वीत तदघोच्छित्यै पञ्चयज्ञान् दिने दिने ॥ ६.१.१॥
देवयज्ञो भूतयज्ञः पितृयज्ञ इति त्रयं ।
ब्रह्मयज्ञनृयज्ञाभ्यां सह पञ्च प्रकीर्तिताः ॥ ६.१.२॥
दैवो यज्ञस्तु होमोत्र भौतो यज्ञो बलिः स्मृतः ।
यज्ञः पिण्डक्रिया पित्र्या ब्राह्मः स्वाध्यायः उच्यते ॥ ६.१.३॥
नृयज्ञोतिथिसल्कार एतैरेव तु पञ्चभिः ।
पञ्चसूनामयैनांसि क्षपयेत् प्रत्यहं गृही ॥ ६.१.४॥
ब्रह्मचारी वनस्थश्च यतिश्चेति त्रयोप्यमी ।
गृहस्थस्य प्रसादेन जीवन्त्यचलितव्रताः ॥ ६.१.५॥
ददत्भिर्ब्रह्मचारिभ्यः श्रद्धया गृहमेधिभिः ।

तत् सहस्रगुणं प्रेत्य भुज्यते प्रत्युपस्थितं ॥ ६.१.६॥
वानप्रस्थाय नीवारकबलान् यस्तु षोडश ।
दद्यात् घृताक्तान् प्रेत्यैष भजेच्चान्द्रमसीः कलाः ॥ ६.१.७॥
यतिहस्ते यदप्यम्भो यत् पुष्पञ्च कुटुम्बिना ।
सकृदप्यर्पितं कस्तदुभयं परिमास्यति ॥ ६.१.८॥
गृहस्थो यजते नित्यं स एव च तपस्यति ।
स एव धाता सर्वेषां तस्माच्छ्लाघ्यो गृहाश्रमी ॥ ६.१.९॥
यथा स्त्रीणां प्रभुर्भर्ता यथा नॄणां द्विजोत्तमः ।
तथैवातिथयो वेद्याः प्रभवो गृहमेधिनां ॥ ६.१.१०॥
यथा न विविधैर्द्धर्म्मैर्न्नोपवासैर्न्न च व्रतैः ।
आरोहति दिवं नारी परन्तु पतिपूजनात् ॥ ६.१.११॥
यथा न स्नानहोमाभ्यां न वेदाध्ययनेन च ।
ब्रह्मचारी दिवं याति परन्तु गुरुपूजनात् ॥ ६.१.१२॥
यथा न विविधैः स्नानैर्न्न चाग्नेः परिचर्यया ।
वनस्थः स्वर्गमाप्नोति किन्तु भोजनवर्जनात् ॥ ६.१.१३॥
यथा न भैक्षमौनाभ्यां न च शून्यालयाश्रयात् ।
योगी सिद्धिमवाप्नोति किन्तु मैथुनवर्जनात् ॥ ६.१.१४॥
तथा न यज्ञैरश्रान्तं न चाग्नेः परिचर्यया ।
गृहस्थः स्वर्गमाप्नोति परन्त्वतिथपूजनात् ॥ ६.१.१५॥
तस्मादतिथिसत्कारे नित्यं जागरितो भवेत् ।
यथा न निन्द्यते लोकैर्यथा न नरकं व्रजेत् ॥ ६.१.१६॥
अतिथिं प्रीणितात्मानमाहारशयनादिभिः ।
आत्मनस्मारकं विद्यादन्धकूपोपमात् गृहात् ॥ ६.१.१७॥
जुहुयाच्चाग्निहोत्रेण सायं प्रातरतन्द्रितः ।
यथाविधि यथाकालं पार्वणादिभिरिष्टिभिः ॥ ६.१.१८॥
यज्ञैर्वा पशुबन्धैश्च चातुर्म्मास्येन वा तथा ।
त्रैवार्षिकाधिकान्नेन सोमञ्च विधिवत् पिबेत् ॥ ६.१.१९॥
शूद्रान्न किञ्चिल्लिप्सेत दद्याच्चेदप्यभीप्सितं ।
इष्टिं वैश्वानरीं कुर्यादशक्तावितरत्र तु ॥ ६.१.२०॥
याजयेच्च सजातीयान् ग्राह्यस्तेभ्यः प्रतिग्रहः ।
राजन्यवैश्यावन्यत्र रामक्षेत्रादिति स्थितिः ॥ ६.१.२१॥
गृहस्थस्यापि नीचानां सेवापद्यपिगर्हिता ।
तामकुर्वन् क्रमैरन्यैः कुर्वीत धनसञ्चयं ॥ ६.१.२२॥
ओघवद्याति चाप्नोति द्रविणं न स्थिरं क्वचित् ।
क्वचित् क्षीणं भवेद्दैवात् क्वचिद्वृद्धिं तदाप्नुयात् ॥ ६.१.२३॥
वृत्तित्यागं न कुर्वीत द्रविणार्थे विचक्षणः ।

विन्देत द्रविणं कालाद्वृत्तिस्त्यक्ता न लभ्यते ॥ ६.१.२४॥
जननीं जनकञ्चापि स्थविरौ गृहिणीं सतीं ।
शिशुं पुत्रञ्च रक्षिष्यन् कुर्याद्वा वृत्तिहिंसनं ॥ ६.१.२५॥
मातरं पितरं वृद्धौ भार्यां साद्ध्वीं सुतं शिशुं ।
गुरुं विप्रं प्रपन्नञ्च भर्तव्यान् भार्गवोब्रवीत् ॥ ६.१.२६॥
गुर्वर्थे न च सङ्कोचं वृत्तेः कुर्यादकिञ्चनः ।
विप्रार्थे च कृतेन्येषां कुर्वन्नपि न दुष्यति ॥ ६.१.२७॥
यद्यस्ति स्वशरीरार्थे यत्किञ्चित् केवलं गृहे ।
गुरुविप्रावुभौ तस्य भागाभ्यां परितोषयेत् ॥ ६.१.२८॥
कन्यादाने यथालाभं गृह्णीयात् सर्वतो धनं ।
यावद्व्ययं ततो गृह्णन्नधिकं स च दुष्यति ॥ ६.१.२९॥
अदृष्टरजसं कन्यां दद्यादेव प्रयत्नतः ।
गृहस्थोभ्रूणहत्याभिरन्यथा परिभूयते ॥ ६.१.३०॥
स्त्रीधनञ्च यथाकामं दद्यात् सम्प्रीतिपूर्वकं ।
तदशक्तौ यथा शक्तिर्यतमानस्य जायते ॥ ६.१.३१॥
संरक्षन् प्राक् ततो दद्यात् कन्यां स्त्रीधनपूर्वकं ।
शक्तौ सत्यां तु नैवर्तुमतीं तां स्थापयेत् गृहे ॥ ६.१.३२॥
कन्यादानेन्नदाने च विद्यादानेप्यनिच्छतः ।
प्रत्यक्षं वा परोक्षं वा शासनं न विधीयते ॥ ६.१.३३॥
तस्माददूरतस्सिद्धिमभिलष्यानुपेक्षया ।
यतमानः पिता तस्याः कृते न क्लेशमर्हति ॥ ६.१.३४॥
नीचेभ्यः पदवीं दद्यान्नीचा दद्युर्य्यथात्मने ।
दूरीकृत्य वशी कुर्यादेव नीचान् विचक्षणः ॥ ६.१.३५॥
दृष्टमात्रे समाहूय मध्यमानन्तिकं नयेत् ।
यथा नान्तर्विषादः स्यात् स्निह्येयुसेतेपि चेयता ॥ ६.१.३६॥
उत्तमेष्वनवद्येषु सम्यगात्मानमर्पयेत् ।
प्रामानपि दयालुत्वाद्यथैते दद्युरञ्जसा ॥ ६.१.३७॥
नीचांश्च मध्यमानित्थमुत्तमानपि च क्रमात् ।
नीचैश्च मध्यमैर्योगैरुत्तमैश्च वशं नयेत् ॥ ६.१.३८॥
इयानेव ह्यशक्तस्य विधिस्सर्वार्थसाधकः ।
तस्मिन् सिद्धे यथाकालं सिद्ध्येत् सर्वं यथाविधि ॥ ६.१.३९॥
इति षष्ठस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
न्याय्येनासाद्य वित्तर्द्धिं तैस्तैर्य्योगैरधिष्ठितैः ।
उक्तानुक्तानि कृत्यानि गृही नाल्पमपि त्यजेत् ॥ ६.२.१॥
श्रौतस्मार्तानि कर्म्माणि सर्वाणि विधिवच्चरेत् ।

येन कामभुगत्र स्यात् प्रेत्य च स्वर्गमाप्नुयात् ॥ ६.२.२॥
त्रिवर्गेप्यविरोधेन दम्पतिभ्यामहर्न्निशं ।
समचित्ततया भाव्यमभिन्नव्रतवृत्तिभिः ॥ ६.२.३॥
न विद्यते पृथक् स्त्रीणां त्रिवर्गावाप्तिसाधनं ।
भावादुतातिदेशाद्वा पत्युर्यत्तु तदेव तत् ॥ ६.२.४॥
सर्वथाप्यनुकूला स्यात् भर्तुस्तत् गृहमेधिनी ।
पतिरेवेश्वरः स्त्रीणामिति धर्म्म्यं वचोनिशं ॥ ६.२.५॥
स्मरन्ती प्रातिकूल्यञ्च यत्नेन परिवर्जयेत् ।
आकाङ्क्षेतामुभावेतौ पुत्रञ्च गुणवत्तमं ॥ ६.२.६॥
अपुत्रयोस्तु दम्पत्योर्न्न लोकोस्त्यपकिल्बिषः ।
पितृभिः पतितौ स्यातां लुप्तपिण्डोदकौ च तौ ॥ ६.२.७॥
पञ्चभिर्द्दशभिः पुम्भिः स्त्रियाः कामो न पूर्यते ।
तस्माद्द्वयोर्बहूनां वा सापत्न्यं पापसाधनं ॥ ६.२.८॥
तथाप्यधिवहेत् भार्यामुदूढां प्राग्गृहाश्रमी ।
सम्भाव्यमाने पुत्रस्य तस्यामुल्पत्यसम्भवे ॥ ६.२.९॥
तामप्यधिवहेदेवमधिविन्ना ययादिमा ।
अन्यया तां न जीवन्त्योर्ज्यैष्ठयोरुभयोरपि ॥ ६.२.१०॥
सर्वास्वेतास्वपत्यस्य सन्दिग्द्धे सति जन्मनि ।
गतयौवनमात्मानं गृहस्थस्समवेक्ष्य च ॥ ६.२.११॥
अनुजेष्वग्रजं दारक्रियया चोपपादयेत् ।
सर्वोपायस्य वैफल्ये स्वीकर्याद्दत्तपुत्रकं ॥ ६.२.१२॥
पिण्डकर्तुर्म्मुखं दृष्ट्वा स प्रेयादिति हि श्रुतिः ।
पुत्र एव हि पिण्डस्य कर्ता मुख्योग्रजन्मनां ॥ ६.२.१३॥
पुत्रस्य मुखमालोक्य गृही मुञ्चेत् कलेबरं ।
म्रियमाणस्य विप्रस्य गृहस्थस्य विषीदतः ॥ ६.२.१४॥
सपुत्रगृहमुल्सृज्य वपुस्त्यक्त्वाभ्युपस्थिते ।
रौरवे घोरघोरे कः पुत्रादन्यः प्रियङ्करः ॥ ६.२.१५॥
सश्रद्धं श्राद्धदानेन पितृसन्तर्पणेन च ।
पारलोकिकगृह्योक्तैर्विधानैरष्टकादिभिः ॥ ६.२.१६॥
क्षेत्रपिण्डेन तीर्थानां सेवया दानतर्पणैः ।
एभिर्विहाय प्रेतत्वं मृतो याति परां गतिं ॥ ६.२.१७॥
अतोत्र लोकेमुत्रापि लालनीयः सुतो मतः ।
गमने पुत्रका यूयं चिरं जीवत जीवत ॥ ६.२.१८॥
एवं रहः प्रकाशं वा सानुकम्पं वचोमृतं ।
आस्वाद्य परितृप्यन्ति पितरः कर्णपायिनः ॥ ६.२.१९॥
निवापाम्बुप्रदातारं पुत्रं दृष्ट्वा प्रयास्यतः ।

आश्वासो जायते यस्मात्तस्मात् पुत्रो महत्तरः ॥ ६.२.२०॥
तस्मादपुत्रो दत्तेन पुत्रवन्तं यथाविधि ।
साधयेत् त्वरयात्मानं प्राप्तं कालमलङ्घयन् ॥ ६.२.२१॥
पुन्नामनरकाद्यस्मात् त्रायतेतोभिधीयते ।
पुत्र इत्यौरसो जात्या दत्तो मन्त्रप्रभावतः ॥ ६.२.२२॥
येषान्तु भागिनेयाः स्युः पिण्डदास्तैरपि स्वयं ।
अप्रमत्तैर्य्यथाकालं भाव्यमत्रार्थगौरवात् ॥ ६.२.२३॥
स्वीकार्यो भागिनेयस्तैर्द्दत्तः पुत्र इवान्यतः ।
अतन्तुकर्ताप्यात्मानमुद्धरेदिति हेतुना ॥ ६.२.२४॥
किञ्च स्त्रीणां विवाहस्तु समन्त्रं कर्म्म नेतरत् ।
दत्तस्वीकरणं तेषु केषाञ्चिच्च समन्त्रकं ॥ ६.२.२५॥
भागिनेयात्मदायादैरपि दत्तविधानतः ।
तस्मान्न केवला ग्राह्या भगिनीत्याह भार्गवः ॥ ६.२.२६॥
कस्मिंश्चित् भागिनेये तु वर्तमाने तदापरां ।
कुलतन्तुविधानार्थं दत्तामनुमतां विदुः ॥ ६.२.२७॥
निषादस्थपतिन्यायो नेष्यते स्मृतिगौरवात् ।
भगिनी भागिनेयश्च निष्पत्तिस्तत्र कर्म्मणा ॥ ६.२.२८॥
न तयोर्जन्मना तेन यत्तयोस्तदपेक्षि तत् ।
अतः पुमांसमादद्युरेतया नान्यया सह ॥ ६.२.२९॥
सहोदरं सहोदर्या यस्माद्दातृषुमुख्यता ।
मातुरेव द्वयोस्तस्मादेष श्लाघ्यतमो विधिः ॥ ६.२.३०॥
एके पुनर्द्वयोः कामात् बह्वीनां नृषु मुख्यकं ।
दानमिच्छन्ति नारीणां स्वीकारञ्च यथामतं ॥ ६.२.३१॥
अयञ्च खलु पूर्वस्मादन्यूनोस्त्यपरो विधिः ।
ऊढामजातप्रसवां दत्तां गृह्णाति यत्तथा ॥ ६.२.३२॥
अयन्तु पूर्वतो न्यूनः किञ्चिदित्यवगम्यतां ।
प्रसूतायाः परिग्राहं सर्वेषामधमं विदुः ॥ ६.२.३३॥
उक्तेषु तेषु सर्वेषु समन्त्रं कर्म्म यत् भवेत् ।
द्वारीकृत्य पुमांसं तत् स्त्रीसंस्कारकृतां व्रजेत् ॥ ६.२.३४॥
रथ्यासु वातवर्षाभ्यां दुष्प्रवेशासु तस्करैः ।
सन्निधानेपि दीपस्य प्रकाशस्तु न युज्यते ॥ ६.२.३५॥
रथ्याप्रकाशनेप्यर्थे दीपः प्रासादमूर्द्धनि ।
निधेयसूत्रयोग्यन्तदन्यत्रोपकरिष्यति ॥ ६.२.३६॥
भागिनेयात्मदायाददत्तस्वीकरणे तथा ।
समन्त्रकर्म्म नान्वेति स्त्रीणामुपयमो न यत् ॥ ६.२.३७॥
तदेव पुंसि योग्यत्वादन्यत्रोपकरिष्यति ।

तस्मात् पुमांसमादद्युः स्त्रियश्च कुलवृद्धये ॥ ६.२.३८॥
यथालाभं यथाकाममिति भार्गवशासनं ।
सति स्वभागिनेये तु तमेवात्र नियोजयेत् ॥ ६.२.३९॥
सहोदरीविहीनोयं यतो न कुलतन्तवे ।
प्रसूतां सहसन्तानां दद्यात् गृह्णीत चेदृशीं ॥ ६.२.४०॥
तत्सन्तानेषु पुरुषो नास्ति चेदितरः पुमान् ।
दातव्यश्च प्रतिग्राह्यस्तया साकमितिस्थितिः ॥ ६.२.४१॥
सूत्रिणामविशेषेण भ्रातैवोदकपूर्वके ।
भार्गवेण समाम्नातो न पित्रादिक्रमो मतः ॥ ६.२.४२॥
विवाहे हि तयोर्मन्त्रैर्विद्यते च करग्रहः ।
अग्नेः परिणयो लाजहोमश्चाश्माधिरोपणं ॥ ६.२.४३॥
सप्तपद्युभयोः शीर्षसंयोगश्चाभिवीक्षणं ।
ध्रुवर्क्षदर्शनं पश्चाद्वाग्विसर्ग इति क्रमात् ॥ ६.२.४४॥
अवशिष्टक्रियाकाण्डो मन्त्रपूर्व इति स्थितिः ।
तदन्वयोद्भवां कन्यां सह भ्रात्रा समर्पयेत् ॥ ६.२.४५॥
सह तेन च गृह्णीयादन्यथा कर्म्म निष्फलं ।
वेदितव्यं यथावच्च प्रायश्चित्तं द्वयोरपि ॥ ६.२.४६॥
यत्रजाता तु तत्रत्यां तामाह जमदग्निभूः ।
यस्या विवाहे लाजानां हवनं मन्त्रतो भवेत् ॥ ६.२.४७॥
तस्या दानेप्युपादाने भ्रातृसाहित्यमाश्रयेत् ।
अन्यथा निष्फलं कर्म्म तदावर्तनमर्हति ॥ ६.२.४८॥
जायते तेन सम्बन्धः कर्म्मजो न कदाचन ।
अयथाविधिदत्तायां स्वीकृतायाञ्च योषिति ॥ ६.२.४९॥
जातो न भागिनेयत्वं लभते न च पिण्डदः ।
स्त्रीणां सम्बन्धवैशेष्यं पुंसाहित्यनिबन्धनं ॥ ६.२.५०॥
पुंसः सम्बन्धवैशेष्यं मन्त्रमात्रमपेक्षते ।
तथापि तां स्त्रियं हित्वा पुमांसं नैव दापयेत् ॥ ६.२.५१॥
दत्तञ्च नैव गृह्णीयात् कुलवृद्धिस्ततो न यत् ।
यदि वंशे सुता काचित्तदा तस्यां कदाचन ॥ ६.२.५२॥
जायेत पिण्डदः कोपीत्यतो नापेक्ष्यते पुमान् ।
येषां समन्त्रानैवास्ति किञ्चित् कर्म्म विधानतः ॥ ६.२.५३॥
दत्तस्वीकरणं तेषां मन्त्रहीनं विदुर्बुधाः ।
तत्रापि दानस्वीकारौ कन्याया एव चोत्तमौ ॥ ६.२.५४॥
ऊढाया मध्यमौ तौ तु सूतवत्यास्तथाधमौ ।
तत्रापि सूतवत्यास्तु स्वीकारे सप्रजो विधिः ॥ ६.२.५५॥
न केवलं समन्त्रेस्मिन्नुच्यते तस्य कारणं ।

नान्यः सम्बन्धविच्छेदी पुत्रस्य स्वस्य चोभयोः ॥ ६.२.५६॥
माता प्रदीयमाना तु सम्बन्धान्तरसङ्गमे ।
संस्कारं कारणीकृत्य सम्प्रस्थापयितुं क्षमा ॥ ६.२.५७॥
भ्रात्रा ज्येष्ठेन मात्रा वा मातुलेनापि वा भवेत् ।
नैते विच्छेत्तुमर्हन्ति तस्याः पुत्रे तदीयतां ॥ ६.२.५८॥
यथा जन्मगृहस्थायास्तस्या दायादिनां नृणां ।
पुत्रस्यैव तु मुख्यत्वं तथा दानात् परञ्च तत् ॥ ६.२.५९॥
भवेदेव तया पूर्वं सम्बन्धो यादृशोस्य तु ।
तस्य दानात् परं किं वा तादृशत्वे विघातुकं ॥ ६.२.६०॥
हीनेपि मातृसम्बन्धे वैभवाद्दानकर्म्मणः ।
यथावत् पुत्रसम्बन्धः स्थास्यत्येवेत्यसंशयः ॥ ६.२.६१॥
हीनताप्रापणे पुत्रसम्बन्धस्य तु सैकिका ।
क्षमते साधु सङ्कल्पसमयाद्यैर्न्न चेतरा ॥ ६.२.६२॥
असिद्धं साधयित्वैव सिद्धमूनयितुं क्षमा ।
तस्माद्दानमेवात्र तयापेक्ष्यं न चेतरत् ॥ ६.२.६३॥
यद्यो जन्मगृहस्थेभ्यो मानस्सम्भाव्यते तया ।
पुत्रस्य सिद्धस्सम्बन्धस्तैरस्य स्वयमेव च ॥ ६.२.६४॥
अतो न तेभ्यो दातव्यः कारणाघटनादिति ।
सन्तानास्तु ससन्तानामनुयान्त्येव धर्मतः ॥ ६.२.६५॥
कृताकृतप्रसङ्गित्वमतस्तत्कारणं मतं ।
तस्मात् प्रसूतास्वीकारे तत्सन्तानांश्चदापयेत् ॥ ६.२.६६॥
मन्त्रकर्म्मविहीनानां पुन्दानादानयोरिह ।
कामचारः परेषां तु पूर्वोक्तं वर्त्म विस्तरात् ॥ ६.२.६७॥
इति षष्ठस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
न दद्यादग्रजं पुत्रमन्यस्मै धरणीसुरः ।
न लोभात् परिगृह्णीयाद्दास्यमानमपि स्वयं ॥ ६.३.१॥
यस्मिन् जाते तु तद्वंश्याः पितरो मुदिताशयाः ।
कुलतन्तुकरोस्माकं निवापाम्बुप्रदायकः ॥ ६.३.२॥
अस्य पुत्रैश्च पौत्रैश्च मोदयिष्यामहे वयं ।
इत्येवाभ्युदयश्राद्धं स्वीकर्युस्स कथं सुतः ॥ ६.३.३॥
अन्यस्मै पितृशापाय दद्यात् कः स्वीकरोतु च ।
पितृकर्म्मविहीनानां तत्प्रसादानपेक्षिणां ॥ ६.३.४॥
ऐहिकामुष्मिकसुखसमृद्धिः सेत्स्यते कथं ।
एकपुत्रो निजं पुत्रमन्यस्मै नोपपादयेत् ॥ ६.३.५॥
उपपादितमप्येनं त्यजेद्विद्वाननाकुलः ।

परहृन्मांसमुद्धृत्य स्वदेहं पोषयेत् कथं ॥ ६.३.६॥
उद्वाहे यावदाख्यातस्सम्बन्ध उचितः पुरा ।
तादृक्सम्बन्धिनं पुत्रं स्वीकुर्यात् भूसुरो गृही ॥ ६.३.७॥
अयमेवोत्तमः पन्था इतरस्त्वापदीष्यते ।
दौहित्रो भागिनेयश्च निन्दितौ सुतकर्म्मणि ॥ ६.३.८॥
अत्यापद्यपि पुत्रत्वे भागिनेयं विवर्जयेत् ।
इति ब्राह्ममर्यादा सङ्क्षेपेण निरूपिता ॥ ६.३.९॥
दान स्वीकरणे पौत्रे विधिस्तूपरि वक्ष्यते ।
क्षेत्रजः कृत्रिमः पुत्रः स्वयन्दत्त इति त्रयः ॥ ६.३.१०॥
पुत्रधर्म्मेषु विप्राणां निषिद्धा भार्गवर्षिणा ।
सहोढस्तु सहोढश्चेद्विधिना पुत्रतां व्रजेत् ॥ ६.३.११॥
ऊढायामौरसो यादृग्विधाता तादृगेव सः ।
औरसे वा सहोढे वा पुत्रे जीवति नापरं ॥ ६.३.१२॥
स्वीकुर्यादविधानान्नपुत्रः स्यात् स्वीकृतोप्यसौ ।
स्वीकर्ता तस्य दाता च स चेति पुरुषास्त्रयः ॥ ६.३.१३॥
प्रायश्चित्तं विना पङ्क्तिं न लभन्त इति स्मृतिः ।
पुत्रस्य स्वेषु दारेषु सन्दिहानेन सम्भवं ॥ ६.३.१४॥
स्वीकृते दत्तपुत्रे जातश्चेदौरसस्सुतः ।
कनीयानपि विप्रेण ज्येष्ठतापरिकल्पनं ॥ ६.३.१५॥
तस्मिन्नेवौरसे कार्यमेषा धर्मस्य पद्धतिः ।
म्रियमाणप्रजां दृष्ट्वा बहुकृत्वो मृतप्रजां ॥ ६.३.१६॥
प्रथमामधिविन्देतद्विर्द्वितीयां सकृत्परां ।
कारणानि च वर्ज्यानि प्रजानाशस्य यत्नतः ॥ ६.३.१७॥
कर्म्माणि यानि यानि स्युः स्मृतिसिद्धानि जानता ।
तेषामलोपःप्रथमं प्रायश्चित्तञ्च लोपिते ॥ ६.३.१८॥
सदारपुत्रपात्राणां स्वदत्तक्षेत्रवासिनां ।
उच्चैस्तरां प्ररुदतां विवासः पुत्रघातकः ॥ ६.३.१९॥
सामुद्रसलिलस्नानं क्षौरञ्च प्रेतधारणं ।
पत्न्यामापन्नसत्वायां वर्ज्यं विप्रेण जानता ॥ ६.३.२०॥
आधानर्क्षे तु विज्ञाते तत्र नाभ्यङ्गमाचरेत् ।
गुरुवारे तु तैलस्य न भाजनमपि स्पृशेत् ॥ ६.३.२१॥
पित्र्यमन्नं न भुञ्जीत परकीयं निमन्त्रितः ।
वाससानाहतेनाङ्गमाच्छाद्य शयनं त्यजेत् ॥ ६.३.२२॥
गर्भिण्यां न रतिं कुर्यान्नाग्नेर्न्निर्वापयेच्छिखां ।
पवित्रमुपवीतञ्च न बद्ध्नीयान्न मेखलां ॥ ६.३.२३॥
गृहिणी च ससत्वा न कर्म्म कुर्यात्तथाविधं ।

न घृतश्रपणं कुर्यात् कूश्माण्डं न च खण्डयेत् ॥ ६.३.२४॥
कूपोदकं न प्रेक्षेत सन्ध्यायां शयनं त्यजेत् ।
मुक्तकेशा न सेवेत निद्रां नोत्तानशायिनी ॥ ६.३.२५॥
उच्छिष्टहस्ता नेक्षेत भास्करं न विना पतिं ।
पश्येत् सोमं वसिष्ठञ्च सर्वथा न त्वरुन्धतीं ॥ ६.३.२६॥
एवमापन्नसत्वायां पत्न्यां ये गृहमेधिनः ।
अतन्द्रिता अस्खलन्तः स्वधर्म्मात् स्युरनापदः ॥ ६.३.२७॥
धर्म्माश्च तेषामधुना सङ्क्षेपेण प्रदर्शिताः ।
विस्तरो विस्तरादेव वेद्यो भार्गवशासनात् ॥ ६.३.२८॥
आस्थाय धर्म्मानित्युक्तान् साकल्येनानुवासरं ।
तावद्यावत् प्रसूतिः स्याद्दम्पती नापराध्यतः ॥ ६.३.२९॥
ययोरेतेषु न श्रद्धा श्रद्धाभङ्गोपि वा क्वचित् ।
अप्रजाविहतौ स्यातां प्रेत्य वा कृतनिष्कृती ॥ ६.३.३०॥
इति षष्ठस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
ग्रहावेशादिविपदः संरक्षेत्तनयं सदा ।
बधाश्चास्य यथाकालमामूलं मान्त्रिकैर्न्नुदेत् ॥ ६.४.१॥
ऊर्म्मिकाञ्च सरुद्राक्षां कण्ठे सन्धारयेत्सदा ।
कटिसूत्रे च शार्द्दूलदन्तान् कण्ठे च तन्नखान् ॥ ६.४.२॥
रम्भापात्रेण कौपीनमथवान्यैश्च तद्विधैः ।
निषिद्धं प्रागुपनयाच्चेलकौपीनधारणं ॥ ६.४.३॥
प्रतिमासञ्च जन्मर्क्षे शिवे रुद्राभिषेचनं ।
विल्वमालानिवेद्यादीन् दूर्वाहवनमेव च ॥ ६.४.४॥
आदित्यसेवामायुष्यमन्यत्सर्वञ्च कारयेत् ।
रक्षेदागन्तुकापत्भ्यस्स यतो नाक्षमस्तदा ॥ ६.४.५॥
स्वापयेन्नान्धकारे वा विजने वा कदाचन ।
मितं स्वादु हितं मेध्यमनुच्छिष्टमवीक्षितं ॥ ६.४.६॥
बुभुक्षितैर्जनैस्तादृग्भक्ष्यञ्च विनियोजयेत् ।
क्रीडापरिच्छदैस्तैस्तैर्म्मनोमुष्य विनोदयेत् ॥ ६.४.७॥
बिभीषिकाभूतजन्तुव्याख्यानैस्त्रासयेन्न तं ।
रम्याः कथास्सुमधुराः श्रावयेच्च दिने दिने ॥ ६.४.८॥
अव्यक्तवर्णमधुरैर्वचनैर्द्धूलिधूसरैः ।
अङ्गैरङ्काधिरूढस्य तनयस्य मृदुस्मितैः ॥ ६.४.९॥
दिनान्युत्सवकल्पानि प्रयान्ति गृहमेधिनां ।
राजवत् पञ्चवर्षाणि दशवर्षाणि दासवत् ॥ ६.४.१०॥
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ।

उद्धर्तव्यो यथा स्वात्मा विद्वद्भिः प्रतिषिद्धतः ॥ ६.४.११॥
ततस्तथात्मनः पुत्रानुद्धरेच्च प्रयत्नतः ।
वेणुस्तम्बस्य दावाग्निर्यथा नाशाय कल्पते ॥ ६.४.१२॥
दुष्पुत्रः कुलनाशाय कल्पते नियतं तथा ।
बालस्सद्वंशजातोपि बाल्ये कुपथगो यदि ॥ ६.४.१३॥
केनापि नार्जवं गच्छेच्छिबिकादण्डवत् पुनः ।
अपथे वासनां दृष्ट्वा नोपेक्षेत तदात्मजान् ॥ ६.४.१४॥
सैव प्राबल्यमासाद्य यद्गुरुच्छेदतां व्रजेत् ।
शुभाशुभाभ्यां मार्गाभ्यां सरित् सरति वासना ॥ ६.४.१५॥
तां विजानन् प्रयत्नेन योजयेच्छुभवर्त्मना ।
सत्पुत्रेण यथा शुद्धिरुभयोर्वंशयोर्भवेत् ॥ ६.४.१६॥
असत्पुत्रेण चाशुद्धिस्तथैवाव्यभिचारतः ।
द्विजत्वञ्चास्य संस्कारैर्जायते नात्र संशयः ॥ ६.४.१७॥
बैजिकं गार्भिकञ्चैनो यत्तैरेवापनुद्यते ।
संस्कृतो मुकुरः पांसुतैलसङ्गान्मलीमसः ॥ ६.४.१८॥
जायतेग्निशिखायोगाद्रूपहानिं भजेत च ।
असत्सङ्गात् प्रयत्नेन तस्मात् पुत्रान् निवारयेत् ॥ ६.४.१९॥
अप्रमत्तः प्रयत्नेन गेहिनी च तदा तदा ।
प्रागष्टमाब्दात् बालेन यद्यदाचरितं भवेत् ॥ ६.४.२०॥
तस्य तस्य फलं कृत्स्नं पितरौ समनुव्रजेत् ।
धर्म्म्ये वर्त्मनि तस्मात् स ताभ्यामेव प्रतिष्ठितः ॥ ६.४.२१॥
नेतव्यो दृढयत्नेन तद्वदेव च बालिका ।
गृहमग्निं धनं पत्नीं पुत्रान् पुत्रींश्च सर्वदा ॥ ६.४.२२॥
स्वं च रक्षन् य आतिष्ठेत् स गृही नेतरो गृही
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
षष्ठस्याध्यायस्य चतुर्थः पादः
षष्ठोध्यायः समाप्तः ॥ ६॥

अथ सप्तमोध्यायः
गृहवास्तुनि कुल्यर्थं न दद्यात् क्वचन स्थलीं ।
कस्यचिद्विप्रकृष्टस्य जात्वनन्यगतेरपि ॥ ७.१.१॥
गोघ्नादिनं ब्रह्महणं पुल्कसं च वनेचरं ।
विप्रस्त्रियं च कुलटां वास्तौ नाक्रामयेत् गृही ॥ ७.१.२॥
वेश्मभूसीमरक्षार्थे गोघ्नन्तु न नियोजयेत् ।
प्रान्ते वृतिक्रियायां च पुल्कसञ्चाप्यनापदि ॥ ७.१.३॥
न बीजं मधुसल्लक्या वपेत् सदनवास्तुनि ।
स्वयं जातां तु तामाशु छेदयेन्न तु पालयेत् ॥ ७.१.४॥

मद्यार्थे मञ्जरीछेदं कारयेन्न गृही क्षितौ ।
विदित्वा तत्प्रतीघातं कुर्वीत च विचक्षणः ॥ ७.१.५॥
यज्ञाङ्गांश्च लतावृक्षांस्तस्यामुत्पादयेत् स्वयं ।
जलाशयान्यमेध्यानि सर्वदा तत्र वर्जयेत् ॥ ७.१.६॥
जलमत्रिदिनछेद्यमस्पृश्यं यस्य वास्तुनि ।
वर्तते तत्गृहे देवा न गृह्णन्ति वषत्कृतिं ॥ ७.१.७॥
कालेनाशुद्धिमापन्ने यापनीयां जलाशये ।
गृहभीमौ तमाच्छाद्य केनापि दिवसं नयेत् ॥ ७.१.८॥
गृहभूदीर्घिकाप्रान्ते शूद्रवेश्म न कारयेत् ।
अन्तरं न दिशेत्तस्माज्जलावतरणस्य वा ॥ ७.१.९॥
कासारो दीर्घिका चाङ्घ्रिजन्मनो गृहवास्तुनः ।
अवतारपथं प्राप्य प्राप्नुयादपवित्रतां ॥ ७.१.१०॥
ऋतुमत्या वृषल्यास्तु पादन्यासं गृहाङ्कणे ।
दाहकस्य च शूद्रस्य वारयेत् गृहरक्षकः ॥ ७.१.११॥
एतेन शौण्डिकाद्याश्च व्याख्याता रजकस्य तु ।
स्नानाम्बरनिधानार्थे विपुलञ्चेत् गृहाङ्कणं ॥ ७.१.१२॥
दूरतः क्कचन प्राप्तिरिष्यते नान्यदा तु सा ।
विप्रकृष्याः स्पृशेयुर्न्न विना वृषलमालयं ॥ ७.१.१३॥
प्रवेशं विप्रकृष्याणामग्न्यगारे न कारयेत् ।
अन्यत्रापि विना शूद्रं दण्डहस्तं च वार्द्धकिं ॥ ७.१.१४॥
लोहकारञ्च तस्यानुयायिनं सहसाधनं ।
सन्धानिकामहासूत्रसहितञ्च शिलाचितं ॥ ७.१.१५॥
सर्वत्र विप्रकृष्याणां सन्निकर्षमुपेयुषां ।
प्रवेशं वारयेदन्तर्न्नैव तक्ष्णा सहागतान् ॥ ७.१.१६॥
विजातीयांश्च शूद्रांश्च सत्यर्थे तु प्रवेशयेत् ।
यथा न च स्पृशेयुस्ते शय्यावस्त्रादिकं तथा ॥ ७.१.१७॥
स्वयं सञ्चारयेत् गेही नयेच्च बहिरेव तान् ।
उद्धारयेयुः पत्राणि भुक्तवत्भिरबान्धवैः ॥ ७.१.१८॥
चतुश्शालान्तराले चेदुच्छिष्टान्नकणादिभिः ।
तत्स्थाने गोमयाम्भोभिर्ल्लेपनं कारयेच्च तैः ॥ ७.१.१९॥
दासीभिरथवा स्वाभिर्न्नान्यः पत्रोद्धृतौ मतः ।
अथवा शुद्धहस्तेन केनचित् कारयेच्च तां ॥ ७.१.२०॥
तेषामुत्थानतः पूर्वं तदीयेन स्वकेन वा ।
हस्तप्रक्षालनाम्बूनि गण्डूषितजलानि च ॥ ७.१.२१॥
पादावनेजनं चाम्बु विप्रादन्यस्य कस्यचित् ।
नालमेतत्त्रिकं सोढुं विप्रगर्ताङ्कणस्थली ॥ ७.१.२२॥

मूत्रं पुरीषं निष्यूतमिति सर्वस्य च त्रिकं ।
अप्रक्षाल्य तु नोच्छिष्टं भाजनं स्थापयेत् गृहे ॥ ७.१.२३॥
सन्ध्ययोरुभयोर्न्नापि रात्रावशनतः परं ।
प्रातस्सायञ्च सम्मार्ज्य प्रोक्षयेत् गोमयाम्भसा ॥ ७.१.२४॥
गृहान्तराले सर्वत्र प्रातरेव गृहाङ्कणे ।
तिसृभिस्तिसृभिर्द्दिक्षु विदिक्षु च दिनात्यये ॥ ७.१.२५॥
वर्तिभिर्घृतसिक्ताभिर्ज्वलिताभिश्च मध्यतः ।
गर्ताङ्कणस्य न्यस्ताभिः प्रीणयेत् गृहिणी शुचिः ॥ ७.१.२६॥
सन्तानदेवता नित्यं यतवाग्गृहपालिनी ।
जलमग्निश्च शालिश्च व्रीहिर्वा शुक्लतण्डुलाः ॥ ७.१.२७॥
दधि पञ्चकमित्येतन्निशि नोच्छेदमर्हति ।
जन्मर्क्षे भौमभृग्वोश्च वारयोर्न्न गृहे गृही ॥ ७.१.२८॥
अतीतशयनस्थानं हित्वान्यत्र शयीत च ।
रेतसः क्षत्रियादीनां न सेकस्यान्तरं दिशेत् ॥ ७.१.२९॥
चतुश्शालान्तरे शूद्रां वासयेत्तु पृथग्गृहे ।
तस्करादिप्रवेशे तु प्रायश्चित्तं च वक्ष्यते ॥ ७.१.३०॥
तच्च कुर्याद्यथाचारमन्यच्चेति दिगीरिता
इति सप्तमस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
वैतानिकाग्नेस्संरक्षा वेद्या वाक्याच्च वैदिकात् ।
गृह्याग्निरक्षणं किञ्चिदुक्तमन्यदिहोच्यते ॥ ७.२.१॥
यथा सादाच्च विच्छेदाद्रक्ष्यो वैवाहिकोनलः ।
तथेतराग्निसंयोगाद्रक्ष्य एष प्रयत्नतः ॥ ७.२.२॥
तथात्यल्पाल्पमध्येभ्यो महत्भ्यश्चाप्यनारतं ।
रक्ष्यो महत्तमेभ्यश्च दोषेभ्यस्स विपश्चिता ॥ ७.२.३॥
मयूरान्यखगोच्छिष्टमाघ्रातं चाखुभोजिना ।
चतुष्पात्भिरपि स्पृष्टमजां चाश्वं विनेतरैः ॥ ७.२.४॥
हविरन्यबलौ कीर्णं शिग्रुगृञ्जनयुक् च वा ।
स्पृष्टं नकुल्या भूस्पृष्टं व्रणस्पृष्टमथापि वा ॥ ७.२.५॥
क्षतबिन्दुकृतस्पर्शं स्पृष्टं पादेन बुद्धितः ।
कुनखस्पृष्टमस्पृश्यभूमौ पतितशेषितं ॥ ७.२.६॥
हविःपर्युषितं चान्नमचतुर्थैश्च जन्तुभिः ।
सहपक्वं हविर्ल्लिक्षामक्षिकामशकादिभिः ॥ ७.२.७॥
ऊहः पिपीलिकाव्याप्ततण्डुलेन कृतं हविः ।
उष्ट्रिकाबडवावाणीमेषादीनां पयस्तथा ॥ ७.२.८॥
नार्याश्च गोःपुनर्द्दुःखदुग्द्धं चावत्सशेषितं ।

अन्यवत्सस्य चोच्छिष्टमाशौचिन्याश्च गोःपयः ॥ ७.२.९॥
घृतं वा दधिवानग्निपक्कं वा काकशेषितं ।
सिलिन्ध्रं हिङ्गु निर्म्माल्यमिति दोषास्समीहिताः ॥ ७.२.१०॥
एभ्योल्पकेभ्यो गृह्याग्निदूषकेभ्यो गृहाश्रमी ।
रक्षेत् प्रयत्नाद्दैवेन तद्योगे निष्कृतिं चरेत् ॥ ७.२.११॥
तथा घृताचिका वम्री मक्षिका नीलमक्षिका ।
तल्पकोत्थाः कचोत्थाश्च यूकाश्चापि घुणाह्वयाः ॥ ७.२.१२॥
प्राणिनश्च पतङ्गाद्याः पिण्डसंवर्तकोन्मुकाः ।
क्षुद्रकण्टकवातूलमङ्कुणाह्वतनूरुहः ॥ ७.२.१३॥
स्वेदाम्बु चोपयुक्तार्द्रवसनाम्बु मुखाम्बु च ।
अनद्ध्ययनवेलोत्थवादः पादेन लङ्घनं ॥ ७.२.१४॥
आखोर्विल् च तदेतेषां संस्पर्शादिश्च योगतः ।
रक्षेद्यथायथं प्राप्ते निष्कृतिञ्च समाचरेत् ॥ ७.२.१५॥
अश्रूणिकर्णनासाक्षिमलानि नखरं तथा ।
आखुभक्षकविण्मूत्रयोगोणुप्राणिनां शवः ॥ ७.२.१६॥
तथोच्छिष्टञ्च विप्राणामेते वेद्या हविर्भुजः ।
साक्षात् स्पर्शे न दोषाय कल्पन्ते गेहिनामिति ॥ ७.२.१७॥
तत्रापि जाते दैवेन विस्मृतेर्वा प्रमादतः ।
निष्कृतिं निष्कृतेः काण्डे वक्ष्यमाणां समाचरेत् ॥ ७.२.१८॥
शूद्रेण पक्कमग्नौ यदनार्द्रमथवार्द्रकं ।
साम्भःस्नेहप्रयोगेण शूद्रोच्छिष्टमपीदृशं ॥ ७.२.१९॥
साम्भःपक्कमदुर्गन्धि चिरपर्युषितं तथा ।
पतितानाममीषाञ्च दाहाद्रक्ष्यो हुताशनः ॥ ७.२.२०॥
तत्रापि निष्कृतिं कुर्याद्दैवादापतिते पुनः ।
सृगाले डुण्डुभे ग्रामसूकरे चरणायुधे ॥ ७.२.२१॥
वानरे चानलं साक्षात् स्पृष्टवत्यपि चाचरेत् ।
एभिरायतने दोषं नीतेपि च यथाविधि ॥ ७.२.२२॥
तथा मृतस्य शूद्रस्य चण्डालायतनस्य च ।
जातितः पतितस्यापि येनकेनापि कर्म्मणा ॥ ७.२.२३॥
सूतिकादाहकोदक्याखराणां चासृजस्तथा ।
मांसस्यस्थ्नश्च विण्मूत्ररेतोमज्जारसस्य च ॥ ७.२.२४॥
पूतिघ्राणाम्बुनश्चोपस्पर्शेनाग्निं विनाशतः ।
संरक्षेत् स चतुर्थश्चेत् स्थालीपाकोस्य निष्कृतिः ॥ ७.२.२५॥
कर्तव्यः पवमानाख्यस्तत्र जाते यथोदितं ।
शावाशुचेरुपस्पर्शात् सूतकाशौ चिनापि वा ॥ ७.२.२६॥
गृहस्थः पालयेदग्निं विप्रकृष्येभ्य एव च

इति सप्तमस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः

पादषल्कात् बहिस्तिष्ठेत् शूद्राग्नेः पतितस्तथा ।
पदत्रयाद्वा सच्छूद्रो रजकः पदषल्कतः ॥ ७.३.१॥
पदद्वादशकान्नारी बहिस्तिष्ठेद्रजस्वला ।
अष्टादशकृते बाह्ये पदानां सूतिका चरेत् ॥ ७.३.२॥
चतुर्विंशतिकात्तेषां दाहकः प्रचरेत् बहिः ।
तक्षा च लोहकारश्च स्वर्णकारश्च कांस्यकृत् ॥ ७.३.३॥
शिलाचिच्छौण्डिकश्चाथ ततो द्विगुणतो बहिः ।
श्वपचः पुल्कसो व्याधश्चैते षत्त्रिंशता पदैः ॥ ७.३.४॥
मितात् बहिरनुक्तास्तु चतुष्षष्ट्या तु केचन ।
इच्छन्ति श्वपचादीनां विप्रकर्षं पदैर्बुधाः ॥ ७.३.५॥
साधारणोपवर्णानां सर्वेषां न तु केवलं ।
गृह्याग्नेरेव बोद्धव्यस्समुदाचार ईरितः ॥ ७.३.६॥
यथाप्रमाणबाह्यस्थास्तेमी वैवाहिकानलं ।
नोपस्पृशेयुस्तत्रापि जाते निष्कृतिरिष्यते ॥ ७.३.७॥
उपस्पर्शेन विप्रस्य स्नानयोग्यस्य नश्यति ।
तं वर्जयेत् प्रयत्नेन तं रक्षेदप्रमादतः ॥ ७.३.८॥
परिहारात् बहिष्ठस्य नाशुद्ध्युपहतस्य च ।
उपस्पर्शेन शूद्रस्य चतुर्थे निष्कृतिं चरेत् ॥ ७.३.९॥
जातितो वेदबाह्यानामाभासोत्तमजन्मनां ।
माभूदग्नेरुपस्पर्शो भूते निष्कृतिं चरेत् ॥ ७.३.१०॥
विप्रस्यानुपनीतस्य साक्षात् स्पर्शेपि सा मता ।
नरस्य तैरुपस्पर्शे वह्निमुद्धरतोपि वा ॥ ७.३.११॥
नौकायाने तु गृह्याग्निमुत्तरोत्तरमाहिते ।
तृतीये भाजने न्यस्य नौकां शूद्रेण वाहयेत् ॥ ७.३.१२॥
अविभक्तो य आशौची तस्य स्पर्शोग्निनाशकृत् ।
उपस्पर्शे विभक्तस्य यथावन्निष्कृतीं चरेत् ॥ ७.३.१३॥
वक्ष्यते सूतकाशौचिनोपस्पर्शेपि निष्कृतिः ।
अकृत्वा शौचमुल्सृष्टमलस्य स्पर्शनेनलः ॥ ७.३.१४॥
नश्यत्येव ततो रक्षेत् बालश्चेदस्ति निष्कृतिः ।
त्रैवार्षिकस्य बालस्य धात्रीं स्पृष्ट्वा रजस्वलां ॥ ७.३.१५॥
अग्नेः स्पर्शे तथा पञ्चहायनस्यापि चेष्यते ।
स्पर्शे पञ्चाधिकाब्दस्य तदानीमेव चेतरां ॥ ७.३.१६॥
तदैवापि च शूद्राच्च नश्यत्येव हुताशनः ।
निष्कृतिस्तु शिशोःस्पर्शे कर्तव्योच्छिष्टताजुषः ॥ ७.३.१७॥

कुमारी ध्यानहोमे तु योग्येति न निषिध्यते ।
दोषाणामिति दिङ्मात्रमग्नेरत्र प्रदर्शितं ॥ ७.३.१८ ॥
काण्डे तु निष्कृतेस्तेमी वक्ष्यन्ते तारतम्यतः ।
शाम्यन्ति समिदाहुत्या केचिदन्येस्रु वाहवैः ॥ ७.३.१९ ॥
उभयस्तैः परे केचित् पूर्णाहुत्यैव केचन ।
पवमानादिकस्थालीपाकैरपि तथेतरे ॥ ७.३.२० ॥
विच्छेदकारिणः केचिदिति सामान्यसङ्ग्रह ।
दोषाणाञ्च लघुत्वादि धर्मशास्त्रानुरोधतः ॥ ७.३.२१ ॥
लौकिकव्यवहाराच्च बुद्ध्वा निष्कृतिमाचरेत् ।
प्रागेव निष्कृत्यर्हेभ्यो दोषेभ्यः पालयेत चेत् ॥ ७.३.२२ ॥
स एव प्रथमः कल्पो येग्न्युच्छेदकराः पुनः ।
दोषास्तेभ्यः प्रयत्नेन गोपायेच्चानलं सदा ॥ ७.३.२३ ॥
इति सङ्ग्रहतः प्रोक्तं गृह्याग्नेः परिरक्षणं ।
शृङ्गग्राहिकया नैते सर्वे बोधयितुं क्षमाः ॥ ७.३.२४ ॥
तथाप्युपरि भूयिष्ठा वक्ष्यन्ते स्वयमूहने ।
सामान्यज्ञापनायैव प्रायो मन्दधियां हि तत् ॥ ७.३.२५ ॥
इति सप्तमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
इतिहासैः पुराणोक्तैरसकृच्चोपवर्णितैः ।
व्यभिचारं सदा पत्न्या मनसोपि निवर्तयेत् ॥ ७.४.१ ॥
यापयेत्सहदासीभिः सच्छत्रावरणां बहिः ।
दूरं दासैश्च विश्वस्तैः प्रवयोभिः कृतात्मभिः ॥ ७.४.२ ॥
आनीयमानं वासो न शुक्लादन्यत्तु धारयेत् ।
करयोः कङ्कणान् कांस्यनिर्म्मितान् नवनिस्वनात् ॥ ७.४.३ ॥
धारयेदथवा रूप्यमयान् नैव हिरण्मयान् ।
नासिकाभरणं केशोन्नहनं तिलकक्रियां ॥ ७.४.४ ॥
वासः प्रवेणिकाबन्धं वर्जयेत कुलाङ्गना ।
सौवर्णे सप्तके धार्ये कर्णपाल्योरनादरं ॥ ७.४.५ ॥
सप्तमासहितं सूत्रं कण्ठे कार्पासतन्तुजं ।
सङ्ग्रामे देवयात्रायां नाटकीयार्थदर्शने ॥ ७.४.६ ॥
उद्यानभूविहारे च गानकन्दुककेलिषु ।
जलक्रीडापणप्राप्तिराजद्वारप्रवेशने ॥ ७.४.७ ॥
म्लेच्छभूयिष्ठ मार्गेण गमने च प्रवर्तनं ।
कारयेन्न वशी भावमधिगच्छेत् गृही स्त्रियः ॥ ७.४.८ ॥
पादाङ्गुलीयकं गुल्फकिङ्किणीमपि नूपुरं ।
चूडारत्नं च सीमन्तगर्भिकाञ्च ललाटिकां ॥ ७.४.९ ॥

नाभिवेष्टनमन्यच्च तादृक् सर्वं न धारयेत् ।
अन्तर्गर्भितकेशाग्रां वर्तयेच्छुचिकर्म्मसु ॥ ७.४.१०॥
द्विजाङ्गनानामाचारस्सम्यग्योयमुदीरितः ।
अवान्तरकुलस्त्रीणां सम एव मतो हि सः ॥ ७.४.११॥
नातितीक्ष्णो न चातीव मृदुः सर्वत्र सर्वदा ।
अरन्ध्रदायी पापस्य गृहस्थो गृहिणीं नयेत् ॥ ७.४.१२॥
कामानस्या यथाशक्ति साधयेदनसूयया ।
बीजसङ्ग्रहणे तैलघृतक्षीरादिकर्म्मसु ॥ ७.४.१३॥
दासीषु चान्नपाने च परिभुक्ते च वाससि ।
वाचापि मनसा चास्याः प्रभुतामुपपादयेत् ॥ ७.४.१४॥
यथाचारं व्रतादीनि सर्वाण्यस्याश्च वर्तयेत् ।
एवं कुटुम्बी संरक्षन् दारान् शर्म्म समाप्नुयात् ॥ ७.४.१५॥
अस्वर्ग्यमयशस्यञ्च कौलटात्वं कुलस्त्रियः ।
कुलनाशकरं तस्य नावकाशं कदाचन ॥ ७.४.१६॥
दद्यात् प्रतीक्षेदत्यर्थं परपुम्भाषणादिकं ।
परनारीरतिर्भर्तुरन्यपुंस्कामतां नयेत् ॥ ७.४.१७॥
अपि स्वधर्मचारिण्याः कन्दर्पो हि बली मतः ।
तस्मात् स्वदारैकरतो लालयन् स्वकुटुम्बिनीं ॥ ७.४.१८॥
साधयन् कामितानस्या न लोके वाच्यतां व्रजेत् ।
यस्य राष्ट्रे चारित्रचलिता भूसुराङ्गनाः ॥ ७.४.१९॥
किं तेन रक्षितं राष्ट्रं तमोन्धं प्रविशेन्नृपः ।
स्त्रीणां चारित्रशुद्धौ तु लोकोयं सम्प्रतिष्ठितः ॥ ७.४.२०॥
असूक्ष्मधिषणा नेमं विदुर्द्धर्म्मं सनातनं ।
रामक्षेत्रे विशेषेण चारित्रपरिपालने ॥ ७.४.२१॥
आचारभेदा बहवो विहिता भृगु सूनुना ।
स्थातव्यमप्रमादेन सर्वैस्तत्परिपालनेः ॥ ७.४.२२॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
सप्तमस्याध्यायस्य चतुर्थः पादः सप्तमोध्यायः समाप्तः ॥ ७॥

अथ अष्टमाध्यायः
प्रथमः पादः
सम्प्राप्ते व्यभिचारस्य संशये गेहेभृत् स्वयं ।
समानाभिजनान् प्राप्य पुरस्कुर्वन् पुरोधसं ॥ ८.१.१॥
सवीयसंशयमावेद्य तानानीय तु पञ्चषान् ।
वाग्मिनः कुशलान् सत्यरतांश्च सपुरोहितान् ॥ ८.१.२॥
साद्धवीर्द्दासीः पृथङ्नीत्वा तिस्रस्तैरनुयोजयेत् ।
स्वीयसंशयनिर्द्देशपूर्वकं रहसि क्वचित् ॥ ८.१.३॥

ताभिः प्रबलतां नीते सन्देहेस्मिन् कुटुम्बिनः ।
गृहिणीं पञ्चमे वेश्मनयनुवेश्य निवासयेत् ॥ ८.१.४॥
अथ तैस्सह निर्गम्य राजानं सदसि स्थितं ।
आवेदयेत् गृही स्वीयं संशयन्तु तथाविधं ॥ ८.१.५॥
यथा मुच्येत सन्देहादस्मादेष जनस्तथा ।
कृत्वा धर्मस्य रक्षा च कार्येत्यभ्यर्थयेत च ॥ ८.१.६॥
नृपोथ चतुरो दूतैरानाय्य परिनिष्ठितान् ।
मीमांसकांश्च स्मार्तञ्च प्रेषयेत्तत् गृहं प्रति ॥ ८.१.७॥
विप्रञ्च स्वप्रतिनिधिं वस्त्रं दत्वावगुण्ठकं ।
तेषु मीमांसकाः प्रश्नान् कल्पयेयुः स्वया धिया ॥ ८.१.८॥
राजप्रतिनिधिं विप्रं स्मार्तञ्च रहसि क्वचित् ।
ग्राहयेयुश्च तिष्ठन्तस्तत् बहिर्वेश्मनि क्वचित् ॥ ८.१.९॥
देवालये वा यत् सत्यं तत्प्रकाशनतत्पराः ।
साक्षिणः सूर्यचन्द्रादीन् प्रार्थयन्तो धृतव्रताः ॥ ८.१.१०॥
आधाय मनसि प्रश्नान् स्मार्तो राज्ञश्च पूरुषः ।
उभावेतौ गृहस्थश्च प्रविशेयुर्गृहञ्च तत् ॥ ८.१.११॥
कुड्येनान्तरितः स्मार्तो द्वारोपान्ते निवेशितां ।
परोक्षमुपविश्याथ पृच्छेदर्थान् हृदि स्थितान् ॥ ८.१.१२॥
राजप्रतिनिधिस्तस्य सन्निधौ मौनमाश्रितः ।
वस्त्रावगुण्ठितशिरा निविशेतावधानतः ॥ ८.१.१३॥
असमीचीनताप्राप्तौ प्रश्नस्यैष क्वचित् क्वचित् ।
अपनीय शिरोवस्त्रं भूतले निक्षिपेत् सुधीः ॥ ८.१.१४॥
तं दृष्ट्वा समनुध्याय यथा मीमांसकोदितं ।
तथैव पृच्छेत् स्मार्तश्च जायमानेस्य सौष्ठवे ॥ ८.१.१५॥
स तु तद्वस्त्रमुद्धृत्य भूयश्च शिरसि क्षिपेत् ।
सन्दिग्द्धदोषयादुत्तान्युत्तराणि च तावुभौ ॥ ८.१.१६॥
धारयेतां प्रयत्नेन स्मार्तो मीमांसकान् प्रति ।
निवेदयेच्च तत्रापि तस्य धर्म्मः पुरोदितः ॥ ८.१.१७॥
एवं यावत् प्रयत्नेन दोषसम्मतिरेव वा ।
छेदो वा संशयस्य स्यात्तावत्पर्यन्तमाचरेत् ॥ ८.१.१८॥
स्वीक्रियेत यदैवागः पृष्टा धर्म्म्येण वर्त्मना ।
तदा तां सम्मुखीभूय पृच्छेत् प्रथमपूरुषं ॥ ८.१.१९॥
तस्मिन्नुक्ते तदन्यश्चेदस्ति तं चापि वाचयेत् ।
एवमागस्कृतस्सर्वांस्तन्मुखाच्छृणुयात् क्रमात् ॥ ८.१.२०॥
कालमन्यच्च सापेक्षं सर्वं चाप्यवधानतः ।
श्रुत्वा हृदि निधायाथ स्थाने संशयमागतं ॥ ८.१.२१॥

मीमांसकांश्च विज्ञाप्य पार्श्वस्थे राजपूरुषे ।
प्रथमोयं द्वितीयोयमिति रीत्या तु तन्मुखात् ॥ ८.१.२२॥
श्रुतं यथा तथा सर्वमथ तैरखिलैरपि ।
राजापि चोपसर्तव्य आवेद्यं तत्र चाखिलं ॥ ८.१.२३॥
आवेदनस्य सम्यक्त्वे वैपरीत्ये च पूरुषः ।
राज्ञस्तत्र न साक्षी स्यात्ते तु मीमांसकास्तथा ॥ ८.१.२४॥
अनावृतशिरा एव तस्मात्तत्र प्रविश्य सः ।
स्मार्तेनावेद्यमानेषु दत्तकर्णो वसेत् क्वचित् ॥ ८.१.२५॥
आवेदनस्यासम्यक्त्वे स्मार्तं मीमांसकाः स्वयं ।
स्मारयेयुः श्रुतं सम्यग् ब्रूयुर्वा स्वयमेव तत् ॥ ८.१.२६॥
अथावसित एतस्मिन् बहिर्गच्छेत् स पूरुषः ।
अथ तां निजदेश्येन विधिना ख्यापितागसं ॥ ८.१.२७॥
बहिर्विधाय कुत्रापि वासयेन्निजमण्डले ।
पश्चात्तापवतीं पश्चादप्रमादपरायणां ॥ ८.१.२८॥
अवृत्या नैव युञ्जीत तां भ्रष्टामपि पार्थिवः ।
पूरुषाश्च बहिष्कार्यास्सर्वे तन्मुखतः श्रुताः ॥ ८.१.२९॥
कालजांस्तु यथाकालमधः कुर्याद्यथाश्रुतं ।
दुष्टायमविदुष्टांश्च संशयेपि च निश्चये ॥ ८.१.३०॥
दुष्टायां जारजान् सर्वान् बहिष्कुर्वीत निश्चये ।
एवं कलेभ्य उद्धृत्य सर्वेभ्यः कुलदूषकान् ॥ ८.१.३१॥
वर्णाश्रमोदितान् धर्म्मान् संरक्षेत् कृतधीः सदा ।
सन्दिग्द्धार्थस्य शुन्यत्वे दासीप्रश्नेन निश्चिते ॥ ८.१.३२॥
समानाभिजनाः ब्रूयुः शुष्कसंशयनिष्कृतिं ।
अशून्यत्वे विधायाम्बुविच्छेदं तान् गृहात् बहिः ॥ ८.१.३३॥
निस्सार्य राज्ञा निर्द्दिष्टे काले शुद्धैर्जनैस्सह ।
विधाय चैनसः शान्तिं गृहस्थो भोक्तुमर्हति ॥ ८.१.३४॥
एवमेव बहिष्कृत्य पुरुषांस्तत्कुलोत्भवाः ।
तत्संसर्गभवान् दोषान् प्रायश्चित्तैर्व्यपोह्य च ॥ ८.१.३५॥
सभ्यैस्समानाभिजनैस्सह भुञ्जीयुरेव ते ।
संसर्गाद्दुष्कृतां नित्यनैमित्तिकमशेषतः ॥ ८.१.३६॥
दूषितं तद्विशुद्ध्यर्थं प्रायश्चित्तं विधीयते
इत्यष्टमस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
संस्कारैस्सुकृतैः प्राप्ते काले पुंसवनादिभिः ।
गार्भिकात् बैजिकाच्चाघात् पुत्रो रक्ष्यः कुटुम्बिना ॥ ८.२.१॥
तेषां कालाननुष्ठाने वक्ष्यमाणं विधिं चरेत् ।

उल्कर्षापादकं कर्म्म संस्कारो हि द्विजन्मनां ॥ ८.२.२॥
जन्ममात्रेण शूद्रास्ते द्विजत्वं कर्म्मनिर्म्मितं ।
एवमप्यवनीदेवशिशवे स्तन्यपायिने ॥ ८.२.३॥
स्तन्यं न दापयेत् पातुं शूद्रया सुकृताग्रही ।
वृषलीस्पृष्टया मात्रा दीयमानौ स्तनौ पिबन् ॥ ८.२.४॥
स्नानात् प्राक् शिशुरब्रह्मवर्च्चस्वी स्यादसंशयं ।
सूतवत्या शुचिर्द्दासी त्वाशौचापगमात् पुरा ॥ ८.२.५॥
स्पर्शे रजकनिर्णिक्तं वासः सर्वं च नान्यदा ।
अशूद्रया न च स्तन्यं दापयेदपवित्रया ॥ ८.२.६॥
स्तन्ये मातुर्विद्यमाने नेतरस्याः प्रशस्यते ।
अस्पृश्यस्पृष्टमस्नानं वारयेत् पानभोजनात् ॥ ८.२.७॥
मासादाद्वादशात् बालः प्रोक्षणेन भवेच्छुचिः ।
बालस्य शूद्रस्पर्शे तु नाशुद्धिः क्वचिदिष्यते ॥ ८.२.८॥
कटिवत् कटिसूत्रं तु कण्ठसूत्रं च कण्ठवत् ।
बालकस्य ललाटस्था सेपनं तु ललाटवत् ॥ ८.२.९॥
स्तन्यपस्य शुचिर्म्माता स्तन्यपाने रजस्वला ।
वयसस्तु चतुर्थात् प्राग्विधिरेष प्रदर्शितः ॥ ८.२.१०॥
उच्छिष्टं पितृशेषं च स्त्रीशेषं गतवासरं ।
हिङ्गुमद्याशयेन्नैव किञ्चित् द्रव्यं गृही सुतं ॥ ८.२.११॥
आरभ्य वपनात् पुत्रं वृषलस्पृष्टमम्बुनि ।
स्नपयेन्न च शूद्रान्नं कामचारोपि सोर्हति ॥ ८.२.१२॥
अक्षरारम्भणादीनि यथाकालं समाचरेत् ।
यथा स तु विनीतस्स्यात्तथा वर्तेत यत्नवान् ॥ ८.२.१३॥
दुहितृष्वपि तुल्योयमुक्तस्सङ्क्षेपतो विधिः ।
द्रष्टव्यो विस्तरस्तस्य भार्गवोक्तमहागमे ॥ ८.२.१४॥
एकं त्यजेत् कुलस्यार्थे बह्वर्थे द्वौ परित्यजेत् ।
गृहार्थे तु त्यजेत् सर्वमात्मनोर्थे गृहानपि ॥ ८.२.१५॥
उपाध्यायमवक्तारं त्यजेच्छिष्यमपाठकं ।
अदुग्ध्ददोहिनीं गां च राजानं चाप्यरक्षकं ॥ ८.२.१६॥
दासानात्मनियतंश्च भार्यामप्रियवादिनीं ।
बिभृयान्न गृही विद्वानात्मरक्षणतत्परः ॥ ८.२.१७॥
यत् स्वगृह्योदितं कर्म्म कार्यत्वेन दिने दिने ।
प्रत्यहं तदनुष्ठायी काम्यकर्म्माणि वर्जयेत् ॥ ८.२.१८॥
प्रतिपक्षं च यत् कृत्यं प्रतिमासमथापि वा ।
प्रत्यब्दमपि गृह्योक्तं तत् सर्वमनुवर्तयेत् ॥ ८.२.१९॥
प्रतिषिद्धान्निवर्तेत सर्वस्मादपि यत्नवान् ।

प्रारब्धभोगैस्तृप्येत न कुर्यात् कामनां क्वचित् ॥ ८.२.२०॥
एतावत्यात्मरक्षेयं विप्रस्य गृहिणः स्मृता ।
एवं क्रमात् गृहादीनां रक्षया विन्दते सुखं ॥ ८.२.२१॥
आत्यन्तिकमिहान्यत्र यत्कामस्तत् समाप्नुयात् ।
तदप्येतादृशं ज्ञात्वा तत्र सक्तश्च मा स्म भूत् ॥ ८.२.२२॥
इत्यष्टमस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
कर्म्मारम्भेषु सर्वेषु देवः पूज्यो गणाधिपः ।
मातरश्च गृहस्थेन ब्राह्मणेन विजानता ॥ ८.३.१॥
गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ ८.३.२॥
सालग्रामशिलापूजां गीतापारायणं तथा ।
सहस्रनाम विष्णोश्च न त्यजेत् प्रतिवासरं ॥ ८.३.३॥
एकादश्यवसानेन युक्तं तूपवसेदहः ।
आदित्योदयतः केचिदह्न आरम्भमूचिरे ॥ ८.३.४॥
अरुणोदयतोन्ये तु त्याज्या सा दशमीयुता ।
तथैवोपवसेद्विद्वान् सिंहे मास्यसिताष्टमीं ॥ ८.३.५॥
चतुर्द्दशीं तथा माघेप्यसितामितरेपि च ।
तिसृष्वेतासु सर्वेषामुपवासं प्रचक्षते ॥ ८.३.६॥
धर्म्मं निष्कारणं तस्मान्न तत् कालं परित्यजेत् ।
पित्र्ये कर्म्मणि तु प्राप्ते त्यजते शिष्टभोक्तृभिः ॥ ८.३.७॥
निमन्त्रितैश्च तत्कर्त्रा भोक्तृभिर्वैष्णवी तिथिः ।
शैवी च नान्यदा तेषामपि तत्त्याग इष्यते ॥ ८.३.८॥
येषां शिष्टभुक्तौ न निर्बन्धः पित्र्यकर्म्मणि ।
सम्प्राप्तेपि न सा त्याज्या नित्यत्वादिति मन्महे ॥ ८.३.९॥
येषां तु विद्यते शिष्टभुक्तौ चावर्जनीयता ।
यावता शिष्टभुक्तिःस्यात् तावत्तेद्युर्न्न चाधिकं ॥ ८.३.१०॥
पश्चादुपवसेयुश्च धर्मलोपमनिच्छवः ।
यथाकामं तु भुञ्जीरन् भोक्तारोत्र निमन्त्रिताः ॥ ८.३.११॥
पश्चादभोजने स्थित्वा प्रातरन्येद्युराप्लुताः ।
निष्कृतिव्रतलोपे या वक्ष्यते धर्मकारणात् ॥ ८.३.१२॥
तां च कुर्युस्तदायत्तैर्भाव्यं तैः पूर्णभोजिभिः ।
एकादश्यां न होतव्याः शालयोग्नौवजानता ॥ ८.३.१३॥
इति केचिन्न तत्ग्राह्यं रामक्षेत्रे त्विह क्वचित् ।
नाग्निर्द्देवाश्च पितरः पित्रर्थे ये च भुञ्जते ॥ ८.३.१४॥
नाधिक्रियन्ते यस्मात्त एकादश्यामिति स्थितिः

इत्यष्टमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः

निवर्तेत च काम्येभ्यो व्रतेभ्यो बुद्धिपूर्वकं ।
शिष्टाचारानुरोधेन नित्यवद्वा समाचरेत् ॥ ८.४.१॥
यद्यद् व्रतमनुष्ठातुमीहते गृहमेधिनी ।
तत्र तत्र च तां विद्वान् कुर्वीत सहचारिणीं ॥ ८.४.२॥
पत्यौजीवति या योषित् स्वयमेव व्रतं चरेत् ।
पत्युरायुः क्षयं नीत्वा सा घोरं नरकं व्रजेत् ॥ ८.४.३॥
विना न तस्मात् भर्तारं भार्या तूपवसेत् सती ।
अश्नन्त्या भर्तृशिष्टान्नं व्रतलोपो न विद्यते ॥ ८.४.४॥
काम्येषु न च भर्तारं चोदयेद् व्रतकर्म्मसु ।
चोदितश्चानुवर्तेत नेच्छेत् स च फलं तथा ॥ ८.४.५॥
एवं वै वर्तमानस्स यावत् पश्यन् निजं वयः ।
गतप्रायं वनं यायात्तया सम्पन्नपुत्रकः ॥ ८.४.६॥
पत्नीं विन्यस्य पुत्रेषु पुत्रयोर्वाथ पुत्रके ।
दत्तेपि वाथवा शिष्ये गच्छेद्वा वनमादृतः ॥ ८.४.७॥
पत्न्या सह वनप्राप्तिं वर्जयेत कलौ युगे ।
रामक्षेत्रे विशेषेण भार्गवस्य वचो यथा ॥ ८.४.८॥
स्नातकस्तु वनं गच्छेत् प्रायेण गतयौवनः ।
अनापद्याश्रमान्नापिगृहस्थो भार्गवक्षितौ ॥ ८.४.९॥
नित्यनैमित्तिकैरेवमुदयच्छेत् स्वकर्म्मभिः ।
कर्म्मभिर्वा विशिष्योक्तैः क्षीणपापः प्रशान्तधीः ॥ ८.४.१०॥
वीतरागो मुमुक्षुश्च प्रव्रजेत् स गृहाश्रमात् ।
तत्रैव वा वसन्नायुश्शेषं चानिन्दितो नयेत् ॥ ८.४.११॥
रागी चेत् स तु तत्रैव स्थातुं कर्म्म च कामदं ।
साङ्गं च विधिवत् कर्तुमर्हत्येव यथा वने ॥ ८.४.१२॥
गृहस्थस्य तु धर्म्माणि व्याख्यातानि समासतः ।
आश्रमत्रयनिष्ठा च यथादेशं निरूपिता ॥ ८.४.१३॥
वनस्थानां तु ये धर्म्मा ये च धर्म्माश्च भैक्षवाः ।
उभये तेभिधास्यन्ते समासान्न तु विस्तरात् ॥ ८.४.१४॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
अष्टमस्याध्यायस्य चतुर्थः पादः
अष्टमोध्यायः समाप्तः ॥ ८॥

अथ नवमोध्यायः

प्रथमः पादः

कालेषु त्रिषु कर्तव्यं स्नानमप्सु वनस्थितैः ।
धार्याणि नखरोमाणि भक्ष्यमन्नमरण्यजं ॥ ९.१.१॥
तेनैव होमस्तेनैव श्राद्धं चातिथिपूजनं ।
शाकमूलफलाहारैश्शाकमूलफलैरपि ॥ ९.१.२॥
श्रद्दधानैरनुष्ठानं स्वैरेवान्नैरिति स्मृतिः ।
वन्यान्नेषु च गृह्यन्तां नीवारादीनि धर्मतः ॥ ९.१.३॥
तुर्ये तुर्येथवा षष्ठे षष्ठे यद्वाष्टमेष्टमे ।
वनस्थो वन्यमश्नीयादन्नं काले द्विजोत्तमः ॥ ९.१.४॥
पक्षान्ते वा यथाशक्ति मासान्ते वा तपश्चरन् ।
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षाकाले निराश्रयः ॥ ९.१.५॥
हेमन्ते च जले तिष्ठंस्तपसा दिवसान्नयेत् ।
स्वानुष्ठानासमर्थस्य जरयाभिहतस्य तु ॥ ९.१.६॥
भृग्वग्निजलसम्पातैर्म्मृतिरेव विधीयते ।
अथ सम्पन्नयोगश्चेत् स्वयमेव कलेबरं ॥ ९.१.७॥
उल्सृज्य कुत्रचित् गच्छेद्दग्ध्वा वा योगजाग्निना ।
उत्तरां वा व्रजेदाशां कर्म्म सन्यस्य चाखिलं ॥ ९.१.८॥
कल्यस्तत्र वसन्नेव स्वार्थं योगेन साधयेत् ।
योगमार्गैर्द्दढीकृत्य दृढेष्वङ्गेष्वतन्द्रितः ॥ ९.१.९॥
स्वाध्यायबन्धुः कामेन वनस्थः प्रेत्य मोदते ।
न योगात् परमः पन्थाः प्रेत्य लोकान् यियासतः ॥ ९.१.१०॥
न योगात् परमं किञ्चित् पापानाञ्च विशोधनं ।
यथाग्निर्द्दहति स्विद्धः शुष्कार्द्राण्यविशेषतः ॥ ९.१.११॥
तथैवोपचितो योगः कर्म्मपाशान् निकृन्तति ।
यथा महाह्रदं प्राप्य मृत्पिण्डस्सम्प्रणश्यति ॥ ९.१.१२॥
तथा योगोदकं प्राप्य कर्म्मपिण्डः प्रणश्यति ।
यदेतत् परमेष्ठित्वं परमेष्ठिनि यच्च वा ॥ ९.१.१३॥
विष्णोर्विष्णुत्वमाम्नातुं रुद्रे रुद्रत्वमेव वा ।
सर्वं तद्योगजं प्राहुर्न्नास्ति योगेन दुर्ल्लभं ॥ ९.१.१४॥
अन्येन लभ्यते तन्न यत्तु योगेन लभ्यते ।
स्वाध्यायाद्योगमातिष्ठेद्योगात् स्वाध्यायमाव्रजेत् ॥ ९.१.१५॥
एवं स्वाध्याययोगाभ्यां योगी कालं नयेन्मुनिः ।
चित्तवृत्तिनिरोधोयं योग इत्युदितो मया ॥ ९.१.१६॥
यथा योगशिखेत्यादौ योगशब्देन नेतरः
इति नवमस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
यमांश्च नियमांस्तद्वदासनं प्राणसंयमं ।

प्रत्याहारं धारणाञ्च ध्यानं चाङ्गं प्रचक्षते ॥ ९.२.१॥
समाधिञ्चास्य योगस्य तान्यष्टौ तेन धारयेत् ।
अन्ये षडासनादीनि योगाङ्गानि प्रचक्षते ॥ ९.२.२॥
यमश्च नियमश्च द्वौ येन चान्यत्र चोदितौ ।
अहिंसादय एवात्र यमाः स्नानादयोपरे ॥ ९.२.३॥
उपवेशनमेवाहुरासनं विविधञ्च तत् ।
तत् सिद्धासनमित्यादिनानाशब्दैर्न्निगद्यते ॥ ९.२.४॥
तावदेवासनं प्राहुर्यावद्देहोह्यचञ्चलः ।
यत्र स्थितवतः पुंसश्चेतः स्याध्यानवर्त्मनि ॥ ९.२.५॥
सुप्रचारं तदेवाहुरासनं नान्यदिष्यते ।
प्राणसंयमनं नाम प्राणस्य गतिरोधनं ॥ ९.२.६॥
इन्द्रियाणां निजार्थेभ्यः प्रत्याहारो निवर्तनं ।
ध्येयैकताानतावृत्तिस्समाधिरिति कथ्यते ॥ ९.२.७॥
यमानभीक्ष्णं सेवेत नियमांश्च मुनिर्य्यदि ।
योगाध्वना समीहेत गन्तुमप्रहतक्रमः ॥ ९.२.८॥
ऋजुकायशिरोग्रीव आसीनः स्तिमिताङ्गकः ।
एकधैव मुहूर्ताद्धं मुहूर्तं वा ततोधिकं ॥ ९.२.९॥
कालमभ्यासयोगाद्वा यामार्द्धं याममेव वा ।
वर्द्धयन्ननुरुध्यैव क्रमं दैर्घ्यमनेहसः ॥ ९.२.१०॥
एकासनस्थमात्मानं याममात्रमचञ्चलं ।
यदा पश्येत्तदा विद्यात्तत्रात्मानं प्रतिष्ठितं ॥ ९.२.११॥
एवं जितासनो भूत्वा प्राणायामं समाचरेत् ।
स्यन्देत चान्यथा वायुरायत्तोपि क्वचित् क्वचित् ॥ ९.२.१२॥
प्राणस्पन्दान्मनःस्पन्दं विद्याद्योगविघातुकं ।
प्राणायामं ततःकुर्यान्मनोरोधनतत्परः ॥ ९.२.१३॥
मन्त्रसाधनमालस्यं धूर्तगोष्ठीपरिग्रहं ।
धातुस्त्रीलोलताञ्चात्र प्रत्यवायं प्रचक्षते ॥ ९.२.१४॥
कुम्भके केवले सिद्धे न किञ्चिदपि दुर्ल्लभं ।
भुवि वा दिवि वान्यत्र लोके वा तस्य योगिनः ॥ ९.२.१५॥
तत् साधयेत् प्रयत्नेन योगी केवलकुम्भकं ।
कुम्भयित्वानिलं दीर्घकालं तस्य तु तिष्ठतः ॥ ९.२.१६॥
प्रस्वेदःस्यात्तनौ पूर्वं तेन मर्द्दनमाचरेत् ।
द्राघीयस्या ततोप्यस्य वायोर्द्धारणया पुनः ॥ ९.२.१७॥
आसनस्थस्य जायेत देहकम्पो रुजां विना ।
ततोप्यधिकया तु स्याद्दर्दुरस्येव चोल्लुतिः ॥ ९.२.१८॥
भूयोप्यधिकमभ्यस्य कालं पवनधारणां ।

भूमिं त्यक्त्वा वसेद्योगी व्योमन्यपि कृतासनः ॥ ९.२.१९॥
अतिमानुषचेष्टासु सामर्थ्यं चोत्भवेत्तदा ।
बहुधापेक्ष्यमाणोपि स्वसामर्थ्यं न दर्शयेत् ॥ ९.२.२०॥
स्वल्पमूत्रोल्पवर्च्चाश्च स्वल्पनिद्रोपि च क्रमात् ।
जायेत च जये वायोर्य्योगी तद्दारणाश्रयात् ॥ ९.२.२१॥
अथ पर्वतसंसिद्धिर्वायोर्द्धारणया भवेत् ।
पूर्वाभ्यधिकया तस्य बलबाहुल्यलक्षणं ॥ ९.२.२२॥
म्रियेत प्रहृतस्तेन ऱ् गजो वा ऱ् गवयोपि वा ।
हस्ती हस्ततलेनैव व्याघ्रो वा सिंह एव वा ॥ ९.२.२३॥
स्याच्च कन्दर्पवद्रूपं तस्य त्रैलोक्यमोहनं ।
उर्वश्याद्या अपि प्रेक्ष्य काङ्क्षेयुस्तस्य सङ्गमं ॥ ९.२.२४॥
स्त्रियं स यदि सेवेत तस्य वीर्यक्षयो भवेत् ।
ततः स वर्जयेदेव स्त्रीसेवां स्वार्थतत्परः ॥ ९.२.२५॥
प्राप्य वायुजयोद्रेकं संरुद्धः पवनः क्वचित् ।
स्खलते यदिचेत्तत्र प्रणवं दीर्घितं जपेत् ॥ ९.२.२६॥
एनसामपनोदार्थमेतावानेवयोगिनः ।
पर्याप्तो विधिराख्यातस्तत्तदागामवेदिभिः ॥ ९.२.२७॥
एतस्यैवाक्षरं ब्रह्म एतदेवाक्षरं परं ।
एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ ९.२.२८॥
एतदालम्बनं श्रेष्ठमेतदालम्बनं परं ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ ९.२.२९॥
इति योह्यञ्जसा विद्वान् प्रणवं प्रयतो जपेत् ।
पापानि तस्य नश्येयुस्सुकृतञ्चर्द्धिमाप्नुयात् ॥ ९.२.३०॥
इति नवमस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
प्रणवस्य जपेनैव विघ्नानुत्सार्य दूरतः ।
वायुधारणया शश्वत् घटावस्थां भजेन्मुनिः ॥ ९.३.१॥
प्राणापानमनोबुद्धिजीवात्मपरमात्मनां ।
यदैक्यघटना सेयं घटावस्थेति कथ्यते ॥ ९.३.२॥
इन्द्रियाणीन्द्रियार्थेभ्य आहृत्यात्मनि धारयेत् ।
कल्पयेदात्मना तेषामर्थवत्तामथार्थिनां ॥ ९.३.३॥
यद्यत् पश्येत्तदा दृग्भ्यां तत्तदात्मेति भावयेत् ।
कर्णाभ्यां शृणुयाद्यद्यद्विन्देद्यद्यच्च नासया ॥ ९.३.४॥
गृह्णीयाज्जिह्वया यद्यल्त्वचा यद्यत् स्पृशेदपि ।
एवं भावनयोपेतो याममात्रं दिने दिने ॥ ९.३.५॥
केवलेन नयेद्योगी वायोः कुम्भनकर्म्मणा ।

एतेन चित्तसामर्थ्यमत्यच्चैरयमाप्नुयात् ॥ ९.३.६ ॥
दूरं गच्छेत् क्षणेनैव स्याद्दूरश्रवणे पटुः ।
दूरदर्शी च वाक्सिद्धः कामरूपो भवेच्च सः ॥ ९.३.७ ॥
अदृश्यकरणीं लब्ध्वा सर्वादृश्यश्च सञ्चरेत् ।
तस्य विण्मूत्रलेपेन हिरण्यत्वमयो व्रजेत् ॥ ९.३.८ ॥
सन्तताभ्यासयोगेन जायेत च विहङ्गमः ।
तदा बुद्धिमता भाव्यं योगिना योगसिद्धये ॥ ९.३.९ ॥
सिद्धयो योगविघ्नास्तन्न रमेतासु योगवित् ।
क्षुळ्ळासु प्रीयमाणस्य ल्योगभाजोत्र सिद्धिषु ॥ ९.३.१० ॥
दूरादेव महासिद्धिस्तस्मात्ता नाद्रियेत च ।
अदर्शयन् स्वसामर्थ्यमप्रमत्तो दिवानिशं ॥ ९.३.११ ॥
स्वानुष्ठानुं विविक्तस्थो वर्तयेत दिने दिने ।
यथा मूढतमः कश्चिद्यथा मूर्खतमोपि वा ॥ ९.३.१२ ॥
यथा हि बधिरःकश्चित्तथा वर्तेत पश्यतां ।
स्वस्वकार्येषु शिष्यास्तं प्रार्थयेयुरनारतं ॥ ९.३.१३ ॥
उच्चैस्सत्कृत्य सत्कृत्य तत्र चावहितो भवेत् ।
प्रणयात्तेष्वनुक्रोशादथवा तदभीप्सितं ॥ ९.३.१४ ॥
सिसाधयिषुरुत्थाय स्वस्वार्थमपि विस्मरेत् ।
अपि स्मरन् गुरोर्वाक्यमभ्यसेतेदनारतं ॥ ९.३.१५ ॥
एवं सन्ततमभ्यस्य घटावस्थाञ्च साधयेत् ।
विना सा सन्तताभ्यासाद्वृथागोष्ठ्या न सिद्ध्यति ॥ ९.३.१६ ॥
तस्मादनारतं कुर्यादभ्यासं योगसाधकः ।
तस्यैवं वर्तमानस्य योगाध्वनि मनस्विनः ॥ ९.३.१७ ॥
लभ्या परिचयावस्था दुर्लभा क्षुद्रयोगिनां ।
यस्यां परिचितो वायुर्द्धारणायोगसंश्रयात् ॥ ९.३.१८ ॥
सुषुम्नामग्निना साकं प्रविशेदनुरोधतः ।
तेनैव सह चित्तञ्च तत्प्राप्तौ तत्र यस्य तु ॥ ९.३.१९ ॥
धारणापञ्चकं कुर्याच्चित्तेन वशवर्तिना ।
आपत्भ्यामाचजानुभ्यां स्थानमाहुर्भुवो बुधाः ॥ ९.३.२० ॥
चतुरश्रं भुवो रूपं लाक्षरं पीतमुच्यते ।
भुवः स्थानेनिलं नीत्वा लकारेणान्वितं सुधीः ॥ ९.३.२१ ॥
ध्यायन् हिरण्मयाकारं चतुर्वक्त्रं चतुर्भुजं ।
तत्रैव धारयंश्चित्तं नीत्वा पञ्च तु नाडिकाः ॥ ९.३.२२ ॥
भूजयं प्राप्नुयात्तस्य भूयोगान्न मृतिर्भवेत् ।
आजानुभ्यामा च पायोरपां स्थानं प्रचक्षते ॥ ९.३.२३ ॥
अर्द्धेन्दुसन्निभं रूपमपां पा बीजमुच्यते ।

शुक्लञ्च तासां स्थाने तु वायुं नीत्वा सबीजकं ॥ ९.३.२४॥
देवं नारायणं ध्यायंश्चतुर्बाहुं किरीटिनं ।
शङ्खेन्दुधवलच्छायं विशदाम्बरमच्युतं ॥ ९.३.२५॥
तत्रैव धारयंश्चित्तं गमयेत् पञ्चनाडिकाः ।
मोचनं सर्वपापेभ्यो जयञ्चापां तदाप्नुयात् ॥ ९.३.२६॥
जलयोगेन मृत्युन्न विन्देत च ततः परं ।
आपायोरं च हृदयाद्वह्निस्थानं प्रचक्षते ॥ ९.३.२७॥
वह्नेस्त्रिकोणं रूपन्तु रक्तं रं बीजमुच्यते ।
वह्निस्थानेनिलं नीत्वा वह्निबीजसमन्वितं ॥ ९.३.२८॥
वरदं त्रीक्षणं रुद्रं भस्मोधूलितविग्रहं ।
तरुणार्कनिभं ध्यायन् सुप्रसन्नमतन्द्रितः ॥ ९.३.२९॥
तत्रैव धारयंश्चित्तं गमयेत् पञ्च नाडिकाः ।
आप्नुयाच्च जयं वह्नेर्न्न गच्छेद्वह्निना मृतिं ॥ ९.३.३०॥
पतिते वह्निकुण्डेपि न दह्येत च वह्निना मृतिं ।
आहुरा हृद आकूर्च्चात् स्थानं वायोर्म्मनीषिणः ॥ ९.३.३१॥
षल्कोणं वायुरूपन्तु कृष्णं यं बीजमुच्यते ।
वायुस्थानेनिलं नीत्वा स्वबीजेन समन्वितं ॥ ९.३.३२॥
ईश्वरं तत्र सर्वज्ञं संस्मरन् विश्वतोमुखं ।
तत्रैव धारयंश्चित्तं गमयेत् पञ्चनाडिकाः ॥ ९.३.३३॥
आप्नुयाद्विजयं वायोस्ततोस्य न मृतिर्भवेत् ।
आकूर्च्चादा च फालान्तादाकाशस्थानमुच्यते ॥ ९.३.३४॥
वर्तुलाकारमाकाशं धूम्रं हं बीजकं मतं ।
व्योम्नःस्थानेनिलं नीत्वा व्योमबीजसमन्वितं ॥ ९.३.३५॥
तत्र योगी स्मरन्नेव व्योमाकारं सदाशिवं ।
बिन्दुरूपं परं ब्रह्म शुद्धस्फटिकभासुरं ॥ ९.३.३६॥
सौम्यं पञ्चमुखोपेतं स्फुरल्बालेन्दुशेखरं ।
सर्वभूषणदीप्ताङ्गं दशहस्तं त्रिलोचनं ॥ ९.३.३७॥
सर्वायुधाढ्यं वरदं सर्वकारणकारणं ।
उमार्द्धदेहं तत्रैव कुर्वंश्चित्तस्य धारणां ॥ ९.३.३८॥
गमयेन्नाडिकाः पञ्च ततो व्योमजयी भवेत् ।
व्योमधारणया तस्य मृतिर्न्न स्यात्ततः पुनः ॥ ९.३.३९॥
आप्नुयात् खेचरत्वञ्च ता इत्थं पञ्च धारणाः ।
ताभिर्द्दत्तशरीरस्य न मृत्युस्तस्य योगिनः ॥ ९.३.४०॥
न सीदेत् प्रलयेप्येष महात्मा परमेष्ठिनः ।
इयमेव वनस्थानां सिद्धावस्था तपस्विनां ॥ ९.३.४१॥
एनामासाद्य वर्तन्ते मुनयः पुण्यकानने ।

तस्माद्वनस्थो योगार्थमुत्तिष्ठेत् प्रयतो द्विजः ॥ ९.३.४२॥
देवखातं बिलं प्राप्य पुण्यशैलस्य सानुनि
इति नवमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
अथाभ्यसेन्मुनिर्ध्यानं व्योमरुद्धानिलस्सदा ।
देवताया अभीष्टाङ्गध्यायी स्यात् प्राग्यथोदितं ॥ ९.४.१॥
इदन्तु सगुणध्यानमणिमादिफलप्रदं ।
युक्तस्य निर्गुणध्याने समाधिश्च ततो भवेत् ॥ ९.४.२॥
सम्प्राप्य समतावस्थां जीवात्मपरमात्मनोः ।
समाधिस्थश्चरेदेष मुनिर्ल्लोके निजेच्छया ॥ ९.४.३॥
अथवा देहमुत्सृज्य लीयेत परमे पदे ।
गत्वा तेनैव देहेन विहरेद्देवभूमिषु ॥ ९.४.४॥
यद्यदिच्छेन्मुनिस्सिद्धस्तत्तद्योगेन साधयेत् ।
एष मुख्यतमः पन्था वनस्थस्य समीरितः ॥ ९.४.५॥
अत्राशक्तो यथाशास्त्रं वन्यां वृत्तिं समाश्रयेत् ।
तस्यामप्यपटोस्तस्य भृग्वादेर्मृतिरीरिता ॥ ९.४.६॥
शक्तस्यापि मुमुक्षुत्वे सन्यासाश्रम इष्यते ।
सन्यस्य श्रवणादीनि कृत्वा निशितया धिया ॥ ९.४.७॥
साक्षात्कृत्य परं ब्रह्म विप्रो निर्वाणमाप्नुयात् ।
विप्राणामेव सन्यासो न तु राज्ञां न वा विशां ॥ ९.४.८॥
तच्च वर्ज्यं कलावाहुरिष्यते भार्गवक्षितौ ।
विप्रेतरस्तु सन्यासिपूजया तान् प्रसादयेत् ॥ ९.४.९॥
चातुर्म्मास्याद्यनुष्ठाने शक्त्या साहाय्यमाचरेत् ।
नामसङ्कीर्तनैर्विप्रसेवया तीर्थसेवनैः ॥ ९.४.१०॥
महाक्षेत्रेषु भजनैस्संसारं निस्तरेत्सुधीः ।
दुर्ल्लभः खलु देहोयं मानुषः क्षणभङ्गुरः ॥ ९.४.११॥
लोकोत्तरसदाचार विशेषात्यन्तशोभिते ।
रामावनीतले जन्मसिद्धिश्चात्यन्तदुर्ल्लभा ॥ ९.४.१२॥
कः सुधीस्तादृशं जन्म सुकृतैश्चिरसम्भृतैः ।
सम्प्राप्य सर्वं विस्मृत्य कामाराधनलम्पटः ॥ ९.४.१३॥
प्रतिग्रहैकनिरतो वारनारीवशंवदः ।
तदीयहावबिम्बोकैर्विस्मरन् सन्ध्ययोर्द्वयोः ॥ ९.४.१४॥
मोक्षमार्गपथीनं स्वमात्मानं पातयेदधः ।
अतोप्रमत्तैस्सततं भाव्यमित्येष विस्तरः ॥ ९.४.१५॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
नवमस्याध्यायस्य चतुर्थः पादः

नवमोध्यायः समाप्तः ॥ ९ ॥

अथ दशमोध्यायः

प्रथमः पादः

ब्राह्मणस्तपसा क्षीणपापश्शमदमान्वितः ।
वीतरागो मुमुक्षुत्वे सन्यासाश्रममाश्रयेत् ॥ १०.१.१ ॥
मातरं पितरं भार्यां पुत्रांश्च स्वजनानपि ।
अनुमोद्यर्त्विजश्चात्र वृणीतेष्टिमितीषया ॥ १०.१.२ ॥
कृत्वा वैश्वानरीमिष्टिं सर्वं दत्वा च दक्षिणां ।
आरोप्याहवनीयादौ प्राणादीन् पञ्च मारुतान् ॥ १०.१.३ ॥
विसृज्य सशिखान् केशान् छित्वा यज्ञोपवीतकं ।
पुत्रं विलोक्य त्वं ब्रह्मत्वं यज्ञस्त्वमिदं समं ॥ १०.१.४ ॥
अनुमन्त्र्येत्थमात्मानमेव तञ्चानुचिन्तयन् ।
नावेक्षमाणस्सन् प्राचीमुदीचीं वा परिव्रजेत् ॥ १०.१.५ ॥
सर्ववर्णेषु भिक्षार्थं विचरेत् पाणिभाजनः ।
प्राणसन्धारणायान्नमश्नीयादौषधं यथा ॥ १०.१.६ ॥
यथालाभं यथा न स्यान्मेदोवृद्धिस्तथैव च ।
एकाहं निवसेत् ग्रामे पञ्चाहं नगरे वसेत् ॥ १०.१.७ ॥
चतुरो वार्षिकान्मासान् ग्रामे वा नगरेपि वा ।
कन्यागारे वसेत् भिक्षुर्वृक्षमूलेथवा वसेत् ॥ १०.१.८ ॥
तीरे वा सरितो दण्डं बिभृयात् कूबराङ्कितं ।
काषायं कटिसूत्रञ्च वासो नान्यदनापदि ॥ १०.१.९ ॥
दृष्टिपूतान् न्यसेत् पादान् वस्त्रपूताः पिबेदपः ।
सत्यपूतां वदेद्वाचं भिक्षापूतञ्च भक्षयेत् ॥ १०.१.१० ॥
दण्डपूतमुषःस्नायी मनःपूतं समाचरेत् ।
मरणं नाभिनन्देत जीवितं वा निराग्रहः ॥ १०.१.११ ॥
भवेच्च निरहङ्कारो नावमन्येत कञ्चन ।
अतिवादांस्तितिक्षेत स्थलं कुर्यान्न तु स्थिरं ॥ १०.१.१२ ॥
यतवाक् सर्वदैव स्यादापदर्थं वदेच्च वा ।
असिना छिन्दतो बाहुं लिम्पतश्चन्दनेन वा ॥ १०.१.१३ ॥
उभयोरप्यकल्याणं कल्याणञ्च न चिन्तयेत् ।
प्राणायामपरो नित्यं धारणाध्यानसंश्रयः ॥ १०.१.१४ ॥
स्याच्च पश्येदनित्यत्वमाकीटादा चतुर्म्मुखात् ।
अमेध्यतां शरीरस्य जरया चाप्यहृद्यतां ॥ १०.१.१५ ॥
शारीरमानसागन्तुव्याधिभिश्च निपीडनं ।
नित्यान्धकारे स्त्रीगर्भे मध्ये मूत्रपुरीषयोः ॥ १०.१.१६ ॥
वासं तत्र च शीतोष्णदुःखानुसहनं सदा ।

बहुदुःखानुभूतिञ्च योनिनिर्गमसङ्कटान् ॥ १०.१.१७ ॥
जायमानस्य सर्वस्य जन्तोर्म्मोहञ्च शैशवे ।
पारतन्त्र्यञ्च सर्वत्र रागान्धत्वञ्च यौवने ॥ १०.१.१८ ॥
योगं दुर्विषयैस्तेन नरकेषु च पातनं ।
नरकेषु महादुःखं तिर्यग्योनिषु जन्म च ॥ १०.१.१९ ॥
ईदृशं यद्यदन्यच्च तत्तत् समवलोकयेत् ।
नाध्यस्येत् कञ्चिदप्यर्थमनुकूलं त्रिविष्टपे ॥ १०.१.२० ॥
तद्वदन्यत्र लोके वा मस्करी सूक्ष्मदर्शनः ।
यानि स्युस्सुखसंज्ञानि स्वापेक्षामात्रकारणात् ॥ १०.१.२१ ॥
तेषामनित्यतां दृष्ट्वा काचन्तु न दृशोर्वहेत् ।
तत्राप्यलब्धे सन्तापं भूयिष्ठं सुखमन्यथा ॥ १०.१.२२ ॥
विदित्वा नैव सक्तः स्यादनासक्तिः परं सुखं ।
स्त्रियःकामेन नश्यन्ति ब्राह्मणा नृपसेवया ॥ १०.१.२३ ॥
नृपास्तु ब्रह्मदण्डेन यतयः कामसङ्गमात् ।
अतो निरस्य तत् सूक्ष्मं सत्यं सदसतःपरं ॥ १०.१.२४ ॥
ज्ञात्वा तदहमस्मीति स्वार्थं न खलु विस्मरेत् ।
इति सङ्क्षेपतः प्रोक्तो भिक्षुधर्म्मो न विस्तरात् ॥ १०.१.२५ ॥
रामक्षेत्रे विशेषोत्र न सर्वान्नीनतां भजेत् ।
अनूनाभिजनैर्विप्रैर्गृहस्थैः प्रार्थितो यदि ॥ १०.१.२६ ॥
तत्गृहेषु यतिः कुर्यादशनं नेतरालये ।
अस्पृश्यस्पर्शने स्नायाद्विप्रकृष्योपसर्पणे ॥ १०.१.२७ ॥
वमने च दिवास्वप्ने स्नायात् स्कन्ने च रेतसि ।
प्रातश्च प्रत्यहं सायमपि वा शक्त्यपेक्षया ॥ १०.१.२८ ॥
शङ्खवादान् पुरस्कृत्य सानुगो गन्तुमर्हति ।
सर्वत्र पादचारी स्यात् भार्गवस्य वचो यथा ॥ १०.१.२९ ॥
सर्वसंस्कारसम्पन्नस्सर्वतो विगतस्पृहः ।
आशासूयादिरहितस्साधनानां चतुष्टये ॥ १०.१.३० ॥
सम्पन्नेर्हति सन्यासं कर्तुं विप्रकुलाग्रणिः ।
नैवोनाभिजनो विप्रो न राजा नोरुजोपि वा ॥ १०.१.३१ ॥
असमानशिखो विप्रो हीनो नाभिजनेन यः ।
तेन पक्वञ्च सर्वान्नमश्नीयादेव वेश्मनि ॥ १०.१.३२ ॥
अन्यत् समानमित्येतद्दिङ्मात्रमुपदर्शितं ।
धर्मस्य समनुग्राह्यं तद्धि यच्चाथ वीक्ष्यते ॥ १०.१.३३ ॥
इति दशमस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
राजधर्म्मानथाख्यास्ये पूर्वस्मादपि विस्तरात् ।

राजा राज्येभषिक्तस्तु पालयेत् पुत्रवत् प्रजाः ॥ १०.२.१॥
तत्तद्धर्म्मे व्यवस्थाप्य स हि धर्मस्य रक्षिता ।
आश्रयेज्जाङ्गलं देशं सस्योपेतञ्च गोहितं ॥ १०.२.२॥
विप्रत्रिपादं विल्शूद्रपादं शीतोष्णयोस्समं ।
धनदुर्गं नृदुर्गं वा महीदुर्गमथापि वा ॥ १०.२.३॥
वनदुर्गं वृक्षदुर्गं शैलदुर्गमुतावसेत् ।
ग्रामाध्यक्षान् नृपः कुर्याद्दशाध्यक्षांश्च कांश्चन ॥ १०.२.४॥
शताध्यक्षात् धर्मगुप्त्यै देशाध्यक्षांश्च धार्म्मिकान् ।
ग्रामाध्यक्षैरपनयेत् ग्रामदोषान्महीपतिः ॥ १०.२.५॥
अशक्यपरिहारांस्तान् दशाध्यक्षेभ्य ईरयेत् ।
तेषामपि तथाभूताञ्छताध्यक्षेभ्य ईरयेत् ॥ १०.२.६॥
तेषामपि तथाभूतान् देशाध्यक्षेभ्य ईरयेत् ।
देशाध्यक्षाः प्रयत्नेन तद्दोषोद्धरणं यथा ॥ १०.२.७॥
कुर्युस्तथा ते कर्तव्या राज्ञा निःश्रेयसार्थिना ।
आप्तान् रहस्यकार्येषु धर्मकार्येषु धार्म्मिकान् ॥ १०.२.८॥
निपुणानर्थकार्येषु शूरान् सङ्ग्रामकर्म्मसु ।
उग्रानुग्रेषु कौटिल्यभाजः कुटिलवृत्तिषु ॥ १०.२.९॥
क्लीबान् स्त्रीषु नियुञ्जीत नीचान् नीचेषु कर्म्मसु ।
दातॄन् दानाधिकारेण योजयेन्न तु लोभिनः ॥ १०.२.१०॥
विद्वान् विद्याधिकारेण विदुषः प्रेक्ष्य योजयेत् ।
प्रजाभ्यः फलषष्ठांशमादद्यात् प्रतिवत्सरं ॥ १०.२.११॥
घृतमाक्षिकयोरंशं गृह्णीयात् पञ्चमं नृपः ।
चतुर्थं गन्धसाराणां त्रिकमाकरजन्मनां ॥ १०.२.१२॥
अर्द्धं मद्यस्य मांसस्य पादांस्त्रींश्च निधेरपि ।
हस्तिनो दक्षिणं दन्तं वैयाघ्रे नखचर्म्मणी ॥ १०.२.१३॥
बालं चमर्याःशृङ्गे द्वे कृष्णसारस्य चर्म्म च ।
वृषणौ पौष्कलौ राजा गृह्णीयात् सकलं फलं ॥ १०.२.१४॥
मरिचादिलताजातं रुद्राक्षतरुजन्म च ।
शाकञ्च शितिशाकञ्च शुष्कपत्रादृते उभौ ॥ १०.२.१५॥
षोडशांशञ्च गृह्णीयाद्राजा सारवस्तरोः ।
नादद्याल्लवणस्यांशमल्पमप्यवनीपतिः ॥ १०.२.१६॥
ऋते च दक्षिणावर्ताञ्छङ्खान् सागरजन्मनां ।
ब्राह्मणेभ्यः करादानमकृत्वा योवनीपतिः ॥ १०.२.१७॥
रक्षेत् प्रजाः स तु प्रेत्य ब्रह्मलोकमवाप्नुयात् ।
आपन्नोपि न कुर्वीत राजा तेभ्यः करग्रहं ॥ १०.२.१८॥
आरण्यकेभ्यो भुञ्जीत तपःषल्भागमक्षयं ।

धर्मस्थासु प्रजास्वासां धर्मषल्भागमर्हति ॥१०.२.१९॥
तथा पापरतास्वासु राजा तल्भागमर्हति ।
वृत्ताढ्ये राज्ञि वृत्तस्था दुर्वृत्ते दुष्टवृत्तयः ॥१०.२.२०॥
अनुकुर्वन्ति राजानं यथा राजा तथा प्रजाः ।
स्वदेशपण्यद्रव्यस्य राजा दशममर्हति ॥१०.२.२१॥
भागमन्यत्रपण्यस्य तस्यार्द्धं पादमेव वा ।
तदिदं शुल्कमित्याहुः शुल्कस्थानमतिव्रजेत् ॥१०.२.२२॥
दम्भाद्यस्तस्य कुर्वीत सर्वापहरणं नृपः ।
सर्वथा प्रकृतिद्विष्टं समारम्भं परित्यजेत् ॥१०.२.२३॥
राजा बलवदालोच्य हन्यात् प्रकृतिदूषकान् ।
चारचक्षुर्न्निरीक्षेत स्वराष्ट्रपरराष्ट्रयोः ॥१०.२.२४॥
एतद्विशिष्यते राज्ञश्चक्षुश्चारात्मकन्तु यत् ।
विप्राः पश्यन्ति वेदेन गावो गन्धेन पार्थिवाः ॥१०.२.२५॥
चारेण चाखिलानर्थान् नेमे पश्यन्ति चक्षुषा ।
साधूनां पूजनं कुर्याद्दुष्टान् दण्डेन योजयेत् ॥१०.२.२६॥
उपायांश्चैव सामादीन् यथापात्रं प्रयोजयेत् ।
सन्ध्यादींश्च गुणांस्तद्वत् स्वधर्म्मं न परित्यजेत् ॥१०.२.२७॥
प्राप्तोप्यन्यत्र कुत्रापि विषये विषयात् स्वतः ।
सर्वान् रक्षेद्विशेषेण गोविप्रशरणागतान् ॥१०.२.२८॥
नोपेक्षेताक्षमोप्येतानेषतस्य महामखः
इति दशमस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
न कुर्यान्मृगयासक्तिं मृगयामपि न त्यजेत् ।
ब्राह्मणानां वनस्थानां रक्षार्थं मृगयेष्यते ॥१०.३.१॥
तेभ्योपराध्यतोप्यत्र राजा वन्यस्य दन्तिनः ।
वधं न कुर्यादुत्सार्य वनान्तरममुं नयेत् ॥१०.३.२॥
मृगयायां परिश्रान्तो राजा क्षुत्तृल्समन्वितः ।
उपस्पृश्यात्भिरश्नीयात् पिबेच्च नकृताप्लवः ॥१०.३.३॥
श्वभिःस्पृष्टोपि पौलिन्दं सामीप्यमपि लम्भितः ।
बाणोद्धरणकृद्देहात् परासोरपि पार्थिवः ॥१०.३.४॥
मृगयायां परिश्रान्त आचम्यापो विशुद्ध्यति ।
इति भार्गव आशास्ते राजा मेध्यो वनेचरः ॥१०.३.५॥
नाक्षेषु सज्जेन्न स्त्रीषु मद्यन्तु परिवर्जयेत् ।
वाक्पारुष्यं त्यजेद्दूरं दण्डपारुष्यवन्नृपः ॥१०.३.६॥
नैवार्थदूषणं कुर्यात् सप्तैतानि मनीषिणः ।
भूभुजो मृगयादीनि व्यसनानि प्रचक्षते ॥१०.३.७॥

सप्तभ्यो व्यसनेभ्यो यो बुद्धिपूर्वं निवर्तते ।
स यशः श्लाघ्यमाप्नोति राजा प्रेत्य च मोदते ॥ १०.३.८ ॥
शिक्षेज्जालमृचं वृत्तं राजौदार्यं प्रकाशयन् ।
परञ्च प्राप्तवर्षी स्यात्तथा न जलमन्यथा ॥ १०.३.९ ॥
निधौ लब्धे तदर्द्धन्तु विप्रेभ्यः प्रतिपादयेत् ।
कोशे प्रवेशयेदर्द्धमवशिष्टा महीपतिः ॥ १०.३.१० ॥
अनिर्वेदितविज्ञातं सर्वञ्चापहरेन्निधिं ।
रक्षेत् बालधनं राजा स्त्रीधनञ्चावधानतः ॥ १०.३.११ ॥
अशक्तस्य च रक्षायां रक्षेदभ्यर्थितो धनं ।
विनष्टस्वामिकं वित्तमविप्रस्य हरेन्नृपः ॥ १०.३.१२ ॥
विनष्टस्वामिकं ज्ञात्वा ब्रह्मस्वं तस्य पार्थिवः ।
स्वामिनं स्वेच्छया कुर्यान्न हरेत्तत् प्रमत्तधीः ॥ १०.३.१३ ॥
विज्ञातस्वामिकं वित्तं चोरेभ्योवाप्य तस्य तु ।
अर्द्धं दद्यान्नृपस्तस्य स्वामिनेर्द्धेन दण्डयेत् ॥ १०.३.१४ ॥
आवेदितश्चेत् प्रागेव सर्वं दद्याच्च तद्धनं ।
दद्याच्च सर्वथा विप्रो यदि स्वामी तु तद्धनं ॥ १०.३.१५ ॥
अज्ञातस्वामिकं चोरात् प्राप्य तत् स्वयमेव तु ।
निस्वेभ्यो वितरेत् कामात् क्षिपेद्वा ह्रदवारिणि ॥ १०.३.१६ ॥
शान्तिस्वस्त्ययनैर्द्देवानुपघाताञ्छमं नयेत् ।
परचक्रोपघातांश्च शस्त्रनित्यतया जयेत् ॥ १०.३.१७ ॥
श्रुतिस्मृतीतिहासार्थकुशलं कुलसम्मतं ।
तपस्विनं शमोपेतं विदधीत पुरोहितं ॥ १०.३.१८ ॥
शुचीनवहिताञ्छक्तिसम्पन्नात् कृतचेतसः ।
सर्वेषु च न येद्राजा स्वस्त्यै सम्यक् सहायतां ॥ १०.३.१९ ॥
व्यवहारान् स्वयं पश्येद्विद्वत्भिर्ब्राह्मणैस्सह ।
ब्राह्मणं वा नियुञ्जीत व्यवहारस्य दर्शने ॥ १०.३.२० ॥
जन्मकर्म्मव्रतोपेता राज्ञा कार्यास्सभासदः ।
रिपौ मित्रे समाः केनाप्यहार्याः क्रोधवर्जिताः ॥ १०.३.२१ ॥
सर्वकार्येषु चाधीनो राजा भवितुमर्हति ।
देवांश्च ब्राह्मणांस्तद्वत्साधून् सम्पूजयेत्तथा ॥ १०.३.२२ ॥
भजेत वृद्धान् राजन्यो ब्राह्मणं नावसादयेत् ।
सत्कर्म्मरतमन्यं वा दद्याद्विप्राय मेदिनीं ॥ १०.३.२३ ॥
प्रायच्छत्सर्वतो भागान् ब्राह्मणेभ्यः प्रजापतिः ।
तानेव च पुरस्कुर्यात्सर्वकार्येष्वमायया ॥ १०.३.२४ ॥
स्वदत्तं परदत्तं वा दैवदत्तमथापि वा ।
स्वतः प्राप्तं कुलाद्वा न तेषां स्वं नृपरिर्हरेत् ॥ १०.३.२५ ॥

अमुख्यं योजयेत्तत्र प्रणष्टे मुख्यभागिनि ।
सर्वसम्बन्धविच्छेदे राजा तद्धर्तुमर्हति ॥ १०.३.२६ ॥
पुत्राद्यास्तस्य दायादा दासान्ता बान्धवा मताः ।
भागिष्वविद्यमानेषु सर्वथा तस्य तद्धनं ॥ १०.३.२७ ॥
त्रीणि वर्षाणि गोपायेत् स्वामिनं प्रतिपालयन् ।
अलब्ध्वा भागिनं पश्चान्निक्षिपेत् सिन्धुसङ्गमे ॥ १०.३.२८ ॥
एवं ब्रह्महिते जाग्रत् सर्वाः पालयति प्रजाः ।
स वै प्रजापतिः साक्षात् प्राजापत्यं पदं व्रजेत् ॥ १०.३.२९ ॥
इति दशमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
आत्मानं सर्वतो राजा गोपायेदप्रमत्तधीः ।
बहवो रिपवस्तस्य स्वराष्ट्रपरराष्ट्रयोः ॥ १०.४.१ ॥
विशेषतोन्नपानेषु विश्वस्तान् विनियोजयेत् ।
विश्वस्तानप्यविश्वस्तान् चित्ते समवधारयेत् ॥ १०.४.२ ॥
अमित्रं मित्रतां याति कार्ये मित्रममित्रतां ।
मित्रामित्रविभागोयं दिव्यानामपि दुर्ल्लभः ॥ १०.४.३ ॥
भार्या ददाति गरलं भर्त्रे पित्रे तथात्मजः ।
ननु स्वार्थपरो लोको परस्वहरणोत्सुकः ॥ १०.४.४ ॥
यद्यस्ति जीविते श्रद्धा तर्हि कश्चिन्न विश्वसेत् ।
प्रायेण विजने राजा गहने च गृहे वसेत् ॥ १०.४.५ ॥
आवश्यके तु सौकर्यं दर्शने चोपपादयेत् ।
विषघ्नमगदं मन्त्रं मणिञ्च बिभृयात्सदा ॥ १०.४.६ ॥
स्मित पूर्वाभिभाषी स्याद्वाचा सन्तर्पयेज्जनान् ।
वद्ध्येष्वपि न कुर्वीत भ्रुकुटीभीषणं मुखं ॥ १०.४.७ ॥
अपराधानुरूपञ्च दण्डं दण्ड्येषु योजयेत् ।
द्वितीयन्न क्षमेतागः पूर्वञ्च बलवत्तरं ॥ १०.४.८ ॥
स्वधर्मस्य परित्यागे नादण्डोस्ति महीपतेः ।
न्याय्यदण्डः स्वराष्ट्रे स्यात् भृशदण्डश्च शत्रुषु ॥ १०.४.९ ॥
अजिह्मः सुहृदि स्निग्द्धे विप्रेषु स्यात् क्षमापरः ।
महापातकिनो हन्याद्विना विप्रान्महीपतिः ॥ १०.४.१० ॥
अत्यन्तागस्कृतं विप्रं कृतचिह्नं स्वराष्ट्रतः ।
राजा निर्वासयेदेष दण्डस्तस्य न चेतरः ॥ १०.४.११ ॥
विप्रस्य ब्रह्महत्यायामशिरस्कं महीपतिः ।
फाले तु पुरुषं कृत्वा देशात्तं च्यावयेन्निजात् ॥ १०.४.१२ ॥
सुराकुम्भं सुरापाने स्तेयेपि च शुनःपदं ।
गुरुतल्पगतौ योनिमन्यत्रापि च तादृशीं ॥ १०.४.१३ ॥

व्यवहारविधौ यद्यदुत्तरत्रोपदेक्ष्यते ।
साधु तत्तदपीक्षेत प्रायश्चित्तेपि यच्च तत् ॥१०.४.१४॥
उक्ताः प्रायेण सङ्क्षेपाद्राजधर्म्मा यथाक्रमं ।
यानातिष्ठन् नृपः कीर्तिं प्रेत्य स्वर्गञ्च विन्दते ॥१०.४.१५॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
दशमस्याध्यायस्य चतुर्थः पादः
दशमोध्यायः समाप्तः ॥१०॥

अथ एकादशोध्यायः
प्रथमः पादः
राजधर्म्मा यथा प्रोक्तास्तथा धर्म्मान् विशामपि ।
अभिधास्ये विशां धर्म्मो वाणिज्यं गोश्च पालनं ॥११.१.१॥
कृषिश्चाध्ययनं दानं यागश्चेति पुरोदितं ।
सत्यानृतेन यो वैश्यो वृत्तिमिच्छेत् स सर्वदा ॥११.१.२॥
वर्जयेत् सततं जाग्रदविक्रेयस्य विक्रयं ।
लवणं चर्म्म लाक्षा च यज्ञसूत्रञ्च मेखला ॥११.१.३॥
सालग्रामशिला मांसं मधु तैलं मनश्शिला ।
अविक्रेयाणि सङ्क्षेपाद्दशैतानि विदुर्बुधाः ॥११.१.४॥
अन्ये गोविक्रयं कन्याविक्रयं वेदविक्रयं ।
अन्नस्य विक्रयञ्चाहुस्सोमविक्रयपञ्चकं ॥११.१.५॥
वर्जनीयान् समासेन तच्च वीक्षेत चेतरत् ।
सहस्रमष्टौ चाचख्याववित्रेयाणि भार्गवः ॥११.१.६॥
तत्र पञ्चदशाद्यानि सङ्ख्यातान्यतिगौरवात् ।
प्रतिवर्षं यथा वृद्धिर्द्दशमांशेन जायते ॥११.१.७॥
मूलस्य सात्विकं प्राहुस्तथा सत्यानृतं बुधाः ।
राजसं पञ्चमांशेन तदाधिक्येन तामसं ॥११.१.८॥
तत्र तामसमुज्झित्वा द्वे चैते समुपाश्रयेत् ।
एकत्रैवाभिसन्धिश्चेत्तदा सात्विकमाश्रयेत् ॥११.१.९॥
विप्रान्न वृद्धिमन्विच्छेदन्विच्छेदवनीपतेः ।
सात्विकीं राजसीञ्चैकामथवा क्रमतस्तयोः ॥११.१.१०॥
वैश्यो वैश्याद्यथाकामं यथालाभञ्च शूद्रतः ।
दासाय दद्यादादाय यत्किञ्चित् पारितोषिकं ॥११.१.११॥
गां प्रभाते पयो दुग्ध्वा वत्सोच्छिष्टं प्रचारयेत् ।
पशव्येषु प्रदेशेषु प्रच्छायतरुशालिषु ॥११.१.१२॥
हिंस्रसत्वविहीनेषु शष्पनिर्ज्झरशोभिषु ।
आवर्जयेच्च सौहित्ये प्रत्याकर्षेण भक्षणात् ॥११.१.१३॥
पानाद्वा सर्वथा नैव प्रहरेदीर्ष्यया हृतः ।

शृङ्गे रज्जुं न कुर्वीत शृङ्गिणीभिर्न्न वाहयेत् ॥ ११.१.१४॥
गोभ्यो ग्रीष्मे तु मध्याह्ने विश्रमं प्रतिपादयेत् ।
अन्यत्रापि च विज्ञाय श्रान्तिं तैस्तैस्तदिङ्गितैः ॥ ११.१.१५॥
य इच्छेत् गोधनस्यर्द्धिं सुकृतस्य च वर्द्धनं ।
दधिनिर्म्मथनं दर्शे वर्जयेच्च प्रयत्नवान् ॥ ११.१.१६॥
वृषानक्लेशयन् कुर्यादामध्याह्नाच्च कर्षणं ।
यथाकालं यथादेशं कुर्वाणो नापराध्यति ॥ ११.१.१७॥
न पर्वणि न सङ्क्रान्तौ न सन्ध्यायां न वा निशि ।
न च कृष्णचतुर्द्दश्यां न जन्मर्क्षे न शार्करे ॥ ११.१.१८॥
नोपरागे न भूकम्पे न रिक्तासु तिथिष्वपि ।
कुर्वीत कर्षणं यत्राप्याचारो न च दृश्यते ॥ ११.१.१९॥
निर्ल्लिख्य मृत्तिकास्ताज्याः खनित्रेणेतरेण वा ।
हलयज्ञाद्विनान्यत्र ततोत्भिःक्षालयेच्च तान् ॥ ११.१.२०॥
आश्वासयेत् गोष्ठगतान् तृणसौहित्यतर्पणैः ।
गोष्ठान्निष्कासयेन्मूत्रगोमयादीन् दिने दिने ॥ ११.१.२१॥
वस्त्राभ्यङ्गादिदानेन लालयेच्च स्वकिङ्करान् ।
तेषां कौटुम्बिकं क्षेमं प्रत्यहं प्रार्थयेत च ॥ ११.१.२२॥
व्यसनेषु च सर्वेषु विश्रान्तिं प्रतिपादयेत् ।
स्निह्येयुस्ते यथा स्वस्मिंस्तथा सर्वञ्च कारयेत् ॥ ११.१.२३॥
अन्नं बहुगुणं विद्यात्सर्वप्राण्यवलम्बनं ।
कृष्यायत्तञ्च तत्तस्मात् कृषिकर्म्मविवृद्धये ॥ ११.१.२४॥
वर्णाश्रमाद्यभेदेन यतितव्यमतस्सदा ।
ब्राह्मणस्तपसा भूपस्सूकरादिनिराकृतेः ॥ ११.१.२५॥
वैश्यः स्वयं प्रवृत्या च शूद्रस्तत्साह्यदानतः ।
स्वधर्म इति वैश्यस्य विशेषोत्र प्रदर्शितः ॥ ११.१.२६॥
एवं सत्यानृतादौ ये वर्तन्ते सततं विशः ।
अन्यत्राध्ययनादौ च तेषां क्षेममनर्गलं ॥ ११.१.२७॥
इति एकादशस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
अथ धर्म्मान् प्रवक्ष्यामि शूद्रस्यापि समासतः ।
स्वधर्मनिरतः शूद्रश्शमवाननसूयकः ॥ ११.२.१॥
कुर्याद्विजानां शुश्रूषां तेभ्यो लब्धेन धारयेत् ।
प्राणान् गृहान् गुरून् पुत्रांस्तेनैव बिभृयात्सदा ॥ ११.२.२॥
कर्शितः कर्षणाज्जीवेत्तत्क्षेत्रे तदनुज्ञया ।
आहूतस्सर्वदा विप्रैः प्रविशेदविलङ्घयन् ॥ ११.२.३॥
अद्येदमन्यत् कर्तव्यमिति तेषु न चिन्तयेत् ।

स्वेनारब्धं त्यजेत् कर्म्म द्विजार्थेत्ययवद्विना ॥ ११.२.४॥
राज्ञः कार्यं प्रतिज्ञातं ब्राह्मणार्थेपि न त्यजेत् ।
विशः कार्यं त्यजेदेव स्वकार्यमिव सर्वदा ॥ ११.२.५॥
ब्राह्मणार्थे सदायत्तो ब्राह्मणान् परितोषयेत् ।
अधिक्षिप्तोपि न ब्रूयादब्रह्मण्यं जघन्यजः ॥ ११.२.६॥
आगःक्षन्तव्यतां तेभ्यो ब्रूयाच्चैव पदे पदे ।
न वदेत् संस्कृतां वाणीं नाश्रयेल्लिपिमूकतां ॥ ११.२.७॥
नैव शास्त्रं पठेन्नैव शृणुयाद्वैदिकाक्षरं ।
न स्नायादुदयात् पूर्वं तपो मन्त्रञ्च वर्जयेत् ॥ ११.२.८॥
कुर्यात् पूर्तञ्च कुर्वीत मौनेन पितृकर्म्म च ।
सुरानित्योपि नैव स्यान्मांसनित्योपि वा तथा ॥ ११.२.९॥
न पिबेत् कपिलाक्षीरं पञ्चगव्यञ्च पादजः ।
विषयेषु प्रसक्तात्मा स्वेच्छाचारं न दर्शयेत् ॥ ११.२.१०॥
यस्माद्यस्मान्निवार्येत यत्र यत्राग्रजन्मभिः ।
तस्मात्तस्मान्निवर्तेत तत्र तत्राविचारयन् ॥ ११.२.११॥
यत्रस्याच्चोदना कृत्ये विप्राणामनसूयया ।
तत्र चाशु प्रवर्तेत सर्वकालमतन्द्रितः ॥ ११.२.१२॥
एवं यो वर्तते शूद्रो वर्तन्ते ये द्विजास्तथा ।
स्वधर्मपरिपूतास्ते सर्वे यान्ति परं पदं ॥ ११.२.१३॥
अत्यापन्नस्य शूद्रस्य वृत्तिः कारुकटक्रिया ।
वेददूषकनीचानां सेवनं स तु वर्जयेत् ॥ ११.२.१४॥
विक्रयं लवणादीनां कुर्याद्वा वृत्तिकर्शितः ।
सर्वं वा विक्रये द्रव्यं तस्येष्टं मांसवर्जितं ॥ ११.२.१५॥
गणरात्रव्रतं शूद्रो नातिष्ठेत्तस्य कारणात् ।
व्रतप्रतिनिधिं दानं कृत्वा मुच्येत पातकात् ॥ ११.२.१६॥
नोद्ध्र्वपुण्ड्री भवेन्नैव पुण्ड्रं गोमयभस्मना ।
धारयेद्विप्रचुल्लीस्थभस्मना धारयेच्छुचिः ॥ ११.२.१७॥
इतिहासपुराणानि न पठेच्छ्रोतुमर्हति ।
एतेन सर्वे व्याख्याताः प्रबन्धा ऋषिभिः कृताः ॥ ११.२.१८॥
शैवात् षडक्षरात्त्यक्त्वा प्रणवं शिष्टपञ्चकं ।
जपन्नपि विनैवाङ्गं नैव शूद्रोपराध्यति ॥ ११.२.१९॥
वर्णसाधारणत्वेन प्रोक्ता यत्तत् समाचरेत् ।
सद्विद्वेषस्तु तत्रापि प्रारब्धमपि तत्त्यजेत् ॥ ११.२.२०॥
न किञ्चिदपि जानाति धर्म्मं वाधर्ममेव वा ।
शूद्रस्तस्य सदाचारे प्रमाणं विप्रभाषितं ॥ ११.२.२१॥
प्रतिकालं प्रमाणानि भिद्यन्ते कालवैभवात् ।

प्रतिदेशञ्च भिद्यन्ते तत् पश्येत् बहुसम्मतिं ॥ ११.२.२२॥
काले सर्वत्र देशे च वीक्ष्य वैदेशिकं त्यजेत् ।
एवं द्विजान् पुरस्कृत्य वर्तमानः पदे पदे ॥ ११.२.२३॥
नावसीदति शूद्रोत्र प्रेत्य स्वर्गञ्च विन्दते
इति एकादशस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
असंस्कृतान् पशून्मन्त्रैर्न्न खादेयुर्द्विजातयः ।
खादेयुस्संस्कृतान्मन्त्रैर्वैदिकं विधिमास्थिताः ॥ ११.३.१॥
यावन्ति पशुरोमाणि तावन्त्येनांसि तद्वधात् ।
वृथापशुघ्नः प्राप्नोति न हन्युस्तद्वृथा पशून् ॥ ११.३.२॥
कृतार्थाः पशवः पूर्वं विसृष्टः परमेष्ठिना ।
क्रतुभूत्यै हि निर्द्दिष्टाः क्रतौ तस्माद्वधोवधः ॥ ११.३.३॥
तादृशं न भवेदेनो मृगहन्तुर्द्धनेहया ।
यादृशन्तु भवेदेनो वृथामांसानि खादतः ॥ ११.३.४॥
अतिपन्नाः क्रतोरर्थे संस्कारैर्विधिवत्त्रयः ।
प्राप्नुवन्त्युत्थितिं पश्चादोषध्यः पशवो द्रुमाः ॥ ११.३.५॥
यज्ञ एव पशोर्हिंसा कार्या न पितृकर्म्मणि ।
दैविकेन्यत्र चाप्येषा मधुपर्केपि नेष्यते ॥ ११.३.६॥
क्रत्वर्थे पशुहन्तारो वेदतत्त्वार्थवेदिनः ।
आत्मनः पशुभिस्सार्द्धं नयेयुर्गतिमुत्तमां ॥ ११.३.७॥
गुरोर्गृहेप्यरण्ये वा विप्रो राजोरुजोपि वा ।
आपद्यपि न कुर्वीत वधं विधिविवर्जितं ॥ ११.३.८॥
वेदेन विहिता हिंसा यज्ञकर्म्मण्यनुग्रहात् ।
ज्ञातव्या सा त्वहिंसेति वेदो धर्मप्रवर्तकः ॥ ११.३.९॥
अहिंसकानि यो भूतान्याहिनस्ति सुखेच्छया ।
जीवन्नपि मृतः पश्चाद्दुःखाद्दुःखमवाप्नुयात् ॥ ११.३.१०॥
प्राणिनां बन्धनं हिंसा सङ्क्लेशनमिति त्रयं ।
दूराद्विहाय लोकेत्र क्षेमं प्रेत्य च विन्दते ॥ ११.३.११॥
यदर्थं यतते यत्र रमते यदुतेच्छति ।
तस्य सिद्धं हि तत्सर्वं निवृत्तो यः परादनात् ॥ ११.३.१२॥
नाहिंसया क्वचिज्जन्तोर्म्मांसमुत्पत्तुमर्हति ।
जन्तुहिंसा न च स्वर्ग्या तस्मान्मांसं विवर्जयेत् ॥ ११.३.१३॥
बन्धनाच्च वधाज्जन्तोः प्रेक्ष्य मांसस्य सम्भवं ।
दयया वा निवर्तेत सर्वमांसस्य भक्षणात् ॥ ११.३.१४॥
श्रूयते महिषादिभ्यो दुःखधारा मरुत्वतः ।
तस्माद्यज्ञवधोपि स्याद्दुःखलेशाप्तये क्वचित् ॥ ११.३.१५॥

अबुध्या भक्षिते मांसे प्रायश्चित्तं चरेद्द्विजः ।
बुद्धिपूर्वं प्रवृत्तोत्र पतितत्वमवाप्नुयात् ॥ ११.३.१६ ॥
न खादति विधिंहित्वा पिशाच इव यः पशून् ।
स वै लोकस्य चक्षुष्यो न च रोगैस्स पीड्यते ॥ ११.३.१७ ॥
पाशदः कण्ठकर्षी च पृष्ठघाती वधे गुरुः ।
अनुमन्ता निहन्ता च क्रेता विक्रयकृत्तथा ॥ ११.३.१८ ॥
संस्कर्ता चोपहर्ता च यो वै मांसस्य खादकः ।
एकादशामी सम्प्रोक्ताः सर्वेपि पशुघातकाः ॥ ११.३.१९ ॥
यत्र स्वमांसं पुष्णीयात् परमांसैरचोदितः ।
नातः पापीयसीं कांचिदवस्थां भार्गवोब्रवीत् ॥ ११.३.२० ॥
तस्मान्मांसं न खादेयुः केरलस्था विशेषतः ।
हुतशेषं विना विप्रा वेदोक्तेनैव वर्त्मना ॥ ११.३.२१ ॥
हिंसापि तद्वत्त्याज्यैव वेदाभ्युपगमो न चेत् ।
प्रतिवर्षं पशुं हत्वा यो यजेत समां समां ॥ ११.३.२२ ॥
यश्च मांसं न चाश्नीयात्तावुभौ सुकृते समौ ।
स्तेयं न कुर्यात्सर्वोपि स्वर्णस्तेयात् पतेदधः ॥ ११.३.२३ ॥
न गच्छेत् परकीयां स्त्रीगम्यागमने पतेत् ।
गोगामि न न दुष्टां स्त्रीं गच्छेत् बुध्वा गतः पतेत् ॥ ११.३.२४ ॥
शूद्रां न गच्छेद्विप्रो वा राजा वा वैश्य एव वा ।
वृषल्यां रममाणो यदेकरात्रेण साधयेत् ॥ ११.३.२५ ॥
तत् भैक्षभुग्जपन्नित्यं त्रिभिरब्दैः परानुदेत् ।
केरलेष्वभिमन्यन्ते वृषलीगमनं प्रति ॥ ११.३.२६ ॥
भार्गवस्याभ्यनुज्ञानं स्नातका अपि भूसुराः ।
दृश्यते न च तत् क्वापि युज्यते न च सर्वथा ॥ ११.३.२७ ॥
नारीगमनसामान्यं स्नातकः परिवर्जयेत् ।
विशेषाद्वृषलीसेवामिति रामदर्शनं ॥ ११.३.२८ ॥
जातितस्तूत्तमां नारीमगम्यामधमामपि ।
समानामपि चान्यस्य सगोत्राञ्च विदुर्बुधाः ॥ ११.३.२९ ॥
सुरापानाद्द्विजस्सद्यो बुद्धिपूर्वात् पतत्यधः ।
अबुध्यापतिते तत्र प्रायश्चित्तन्तु वक्ष्यते ॥ ११.३.३० ॥
पापात्मना येन साकं संसज्येत स वत्सरात् ।
प्राप्नुयात्तत्समानत्वं तत्संसर्गमतस्त्यजेत् ॥ ११.३.३१ ॥
इति एकादशस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः
यथेष्टान्नं चरेद्विप्रे वसन् गुरुकुलेन्वहं ।
तदेव मेध्यं वै तस्य देवामृतमुच्यते ॥ ११.४.१ ॥

देवान् पितॄन् मनुष्यांश्च भृत्यांश्च गृहदेवताः ।
प्रीणयित्वात ऊर्द्ध्वन्तु गृहस्थः शेषभुग्भवेत् ॥ ११.४.२॥
वन्यान्नभुग्वनस्थःस्यादुलूखलविधिं विना ।
भिक्षा एव स्यादथवा वायुभोजनः ॥ ११.४.३॥
तदे यतिरश्नीयादम्भसा पुटितं सकृत् ।
तदेव ब्रह्म तन्मेध्यं मेध्यं स ब्रह्म चार्हति ॥ ११.४.४॥
अन्नं नामेति यत् किञ्चिदशुचिस्तत् परित्यजेत् ।
परागात् पुरा यामौ द्वावन्ने वर्जयेत् सदा ॥ ११.४.५॥
ततःपरञ्च निर्म्मुक्तेः स्नातो भोजनमर्हति ।
गोब्राह्मणोपरागे तु न ज्ञातोजनं चरेत् ॥ ११.४.६॥
नैवाद्याद्व्यसनस्थे च राज्ञि बन्धुजनेपि वा ।
नार्द्धरात्रे न मध्याह्ने नाजीर्णे न च सन्ध्ययोः ॥ ११.४.७॥
नार्द्रवासा न नग्नो न जालस्थो न नभस्थितः ।
न भिन्नासन आसीनो न चैवात् कुटिकासनः ॥ ११.४.८॥
नोत्सङ्गे न शयानश्च न च भिन्ने तु भाजने ।
न पाणौ न च मेदिन्यां न यत्र लवणं पुरा ॥ ११.४.९॥
बालार्न्निर्भर्त्सयन्नाद्यान्नैकः साकं न शत्रुभिः ।
न दारैर्न्नच पङ्क्तिस्थः पङ्क्तिपूता न चेत् बुधः ॥ ११.४.१०॥
न रात्रौ तिलसम्मिश्रं न दद्ध्यहनि नो पयः ।
नाहुत्वा नैव चादत्वा स्वपित्रोर्न्न च कृत्यवान् ॥ ११.४.११॥
नोच्छिष्टं नाघृतं चान्नमनर्च्चित्वा न भार्यया ।
बहूनां प्रेक्षमाणानां नैव नापि बहिर्गृहे ॥ ११.४.१२॥
नैकस्मिन् बहवो नैव शून्यगेहे न गर्हितं ।
न प्रौढपादःक्षेमार्थी नातिसौहित्यमाचरेत् ॥ ११.४.१३॥
शुद्धावाचारमाहारं कुर्वाणस्य मुहुर्म्मनः ।
शुद्धं स्यादतिशुद्धेत्र विश्वात्मा सम्प्रकाशते ॥ ११.४.१४॥
तस्माद्यतेरन् सर्वेपि स्वाचाराहारशोधने ।
अन्यथान्धं तमःप्राप्य दुःखाद्दुःखमवाप्नुयात् ॥ ११.४.१५॥
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
एकादशस्याध्यायस्य चतुर्थः पादः
एकादशोध्यायः समाप्तः ॥ ११॥

अथ द्वादशोध्यायः
प्रथमः पादः
यश्च व्याकुरुते वाणीं यश्च मीमांसते क्रतुं ।
तावुभावपि वृत्तस्थौ ज्ञातव्यौ पङ्क्तिपावनौ ॥ १२.१.१॥

ताभ्यामग्रासनं दत्वा भोक्तव्यं पङ्क्तिसंश्रितैः ।
एष भार्गवनिर्द्दिष्टः पन्थाः केरलवासिनां ॥ १२.१.२ ॥
सदाचारान् प्रवक्ष्यामि समासेन शुभावहान् ।
अवमानं कुर्वीत कस्यचित् क्षेमकौतुकी ॥ १२.१.३ ॥
हीनाङ्गानधिकाङ्गान् वा विकृताङ्गानथापि वा ।
न हीनांश्च न मूर्खांश्च प्रहसेद्व्याधितानपि ॥ १२.१.४ ॥
न हीनसेवनं कुर्यान्न स्वाध्यायं द्विजस्त्यजेत् ।
वर्णस्य चाश्रमस्यापि वयसोभिजनस्य वा ॥ १२.१.५ ॥
श्रुतस्य च धनस्यापि देशस्य समयस्य च ।
अनुरूपेण वेषेण वर्तेत न च गर्हितः ॥ १२.१.६ ॥
नित्यं शास्त्रार्थवीक्षी स्याज्जीर्णवान्नो न धारयेत् ।
मलिनञ्च तथा तद्वत् सच्छिद्रं विभवे सति ॥ १२.१.७ ॥
न नास्तीत्यभिभाषेत म्लेच्छभाषां न चाभ्यसेत् ।
न पश्येद्दर्प्पणे आत्मीयं नात्मानं तैलतोययोः ॥ १२.१.८ ॥
न क्रुद्धस्य गुरोर्वक्त्रं न भुञ्जानाञ्च गेहिनीं ।
न च नग्नां न चोदक्यां न स्त्रियं भ्रष्टकञ्चुकां ॥ १२.१.९ ॥
नान्यगुह्यं निजं गुह्यमन्यस्मै न च दर्शयेत् ।
कन्यायोनिं न वीक्षेत तिरश्चाञ्च न मैथुनं ॥ १२.१.१० ॥
नामेध्यं प्रक्षिपेदग्नौ नाग्निं पादेन लङ्घयेत् ।
पादौ न तापयेदग्नौ तन्मार्ष्टिं न कुशैश्चरेत् ॥ १२.१.११ ॥
न कांस्यभाजने न्यस्येन्नाक्रामेदङ्घ्रिमङ्घ्रिणा ।
न लोष्टमर्द्दनं कुर्यान्न चैव भुवमालिखेत् ॥ १२.१.१२ ॥
न दन्तैर्न्नखलोमानि छिन्दाद्द्यूतं विवर्जयेत् ।
वस्त्रमन्यधृतं नैव धारयेन्न तु पादुके ॥ १२.१.१३ ॥
उपवीतं न बिभृयात् भिन्नञ्च विधिवर्जितं ।
नोच्छिष्टहविषी दद्यान्न शूद्राय चाक्षरं ॥ १२.१.१४ ॥
न तिलान्नं न शूद्रस्य पौरोहित्यमुपाश्रयेत् ।
नोदक्यामभिभाषेत सुप्तं नैव प्रबोधयेत् ॥ १२.१.१५ ॥
परक्षेत्रे चरन्तीं गां न ब्रूयान्नापसारयेत् ।
न वत्सकं पिबन्तं वा शूद्रराज्ये स्थितिं त्यजेत् ॥ १२.१.१६ ॥
अधार्म्मिकजनाकीर्णे वैद्यहीने च निर्ज्जले ।
वृथा चेष्टां न कुर्वीताप्यश्लीलमनृतं त्यजेत् ॥ १२.१.१७ ॥
नात्मानमवमन्येत परमर्म्माणि न स्पृशेत् ।
सन्ध्यां चिरमुपास त शस्त्रक्रीडां परित्यजेत् ॥ १२.१.१८ ॥
निमित्तेन विना खानि न स्पृशेदशुचीनि च ।
न कुर्याल्लोकविद्विष्टं धर्ममप्युदितं क्वचित् ॥ १२.१.१९ ॥

कुर्यात् पर्वसु शान्त्यर्थं जपहोमादिकाः क्रियाः ।
इति प्रोक्तस्सदाचारस्समासेन न विस्तरात् ॥१२.१.२०॥
शिष्टेष्वर्थेषु साधूनां वृत्तस्यैव प्रमाणता
इति द्वादशस्याध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः
बहुस्मृत्युदितं सम्यक् साधुभिश्च निषेवितं ।
आचारमाश्रयेन्नित्यं धर्मकामो जितेन्द्रियः ॥१२.२.१॥
आचारादाप्नुयादायुराचारादीप्सितां गतिं ।
आचाराच्छ्रियमक्षय्यामाचाराच्च कलेर्ज्जयं ॥१२.२.२॥
सर्वलक्षणहीनोपि सदाचारं समाश्रितः ।
श्रद्धावाननसूयुश्च जीवेदेव शतं समाः ॥१२.२.३॥
स्त्रीधर्म्मानभिधास्यामः पृथगेवाथ कांश्चन ।
शयनादुत्थिता धौतपञ्चका धृतमंशुकं ॥१२.२.४॥
परिवर्त्य पुनर्द्धौतपञ्चका गृहकर्म्मसु ।
प्रवर्तेतोदयात् पूर्वं गृहसम्मार् तथाज्जन ॥१२.२.५॥
दधिनिर्म्मन्थनञ्चापि कुर्वीत गृहमेधिनी ।
अमावास्या च सङ्क्रान्तिः पित्र्यं कर्म्म पुरोगतं ॥१२.२.६॥
त्रयमेतदतित्यैव दद्ध्नो मथनमाचरेत् ।
मन्थमावर्जयेद्दध्नि यल्गृहे दर्श आगते ॥१२.२.७॥
तस्य गावः प्रणश्येयुश्शपेयुः पितरश्च तं ।
सङ्क्रान्तौ पितरः श्रुत्वा दधिनिर्म्मथनध्वनिं ॥१२.२.८॥
अरुन्तुदमिवावाप्य प्रतिष्ठेरन् पराङ्मुखाः ।
पित्र्ये कर्म्मणि नेदिष्ठे मथनं यत्र जायते ॥१२.२.९॥
न तत्र कव्यं पितरो हव्यं नाद्युश्च देवताः ।
आद्यो निषेधः सर्वेषां समानोत्र ततो द्वयं ॥१२.२.१०॥
आशास्ते ब्राह्मणस्यैव मुनिः केरलवासिषु ।
ततः प्रक्षाल्य पात्राणि गां दुग्द्ध्वाथ विसृज्य ताः ॥१२.२.११॥
स्नायादावश्यकञ्चान्यत् कुर्वीत तदनु स्वयं ।
समित्कुसुमदर्भादि सर्वं सम्पाद्य साधनं ॥१२.२.१२॥
हव्यं कव्यं तथान्नञ्च पचेदमलिनाम्बरा ।
नार्द्राम्बरा न विस्रस्तकेशा सम्यक्प्रबुद्धधीः ॥१२.२.१३॥
प्रयतोपचरेदग्निं भर्तारञ्च सदोत्सुका ।
अभुक्तवति नैवाद्यात् भुञ्जाने वा स्वभर्तरि ॥१२.२.१४॥
एकस्मिन्नेव भुञ्जीत भाजने सति सम्भवे ।
पतिप्रवणतां हित्वा न क्षणं स्थातुमर्हति ॥१२.२.१५॥
पत्युः प्रतीपान् न वदेद्वाचा वाचंयमं पतिं ।

विलोक्य तं भाषेत क्रुद्धे स्मेरमुखी भवेत् ॥१२.२.१६॥
शक्त्या सर्वत्र दाक्षिण्यमातिष्ठेदनसूयया ।
सपत्नीषु सखीवृत्तिमनुतिष्ठेदनारतं ॥१२.२.१७॥
तथा गुरूणां शुश्रूषां कुर्यान्नित्यमतन्द्रिता ।
पुत्रान् न भर्त्सयेत् बालान् पोषयेच्च हिताशनैः ॥१२.२.१८॥
स्तन्याशिने यथाकालं स्तन्यं दद्यात् प्रसन्नधीः ।
अन्नमन्नाशिने दद्याच्छिशवे न शपेत् क्रुधा ॥१२.२.१९॥
रुदन्तं सम्प्रतीक्षेत नोपेक्षेतान्यदुत्सुका ।
अर्च्चयेद्देवता नित्यं भर्तृमुख्याः शुचिव्रता ॥१२.२.२०॥
तीर्थयात्रां न कुर्वीत पतिवत्नी कुलाङ्गना ।
भर्तुःपादोदकं तस्यास्तीर्थं नेतरदिष्यते ॥१२.२.२१॥
विधवापि न तीर्थाय स्वसीमानमतिव्रजेत् ।
सीमा तु दाक्षिणात्यानां सिन्धुः कुम्भवती मता ॥१२.२.२२॥
औत्तराणान्तु तामाहुः सरितं तु पयस्विनीं ।
सर्वेषामपि सह्याद्रिःसीमेति त्रिविधा मता ॥१२.२.२३॥
केरलेषु न चान्यत्र सीम्ना कापि निबन्धना ।
तीर्थश्राद्धं न कुर्वीत द्विजानामिह योषितः ॥१२.२.२४॥
स्नायादम्बुनि गङ्गायाः केरलेषु निलैव सा ।
नद्या रोधसि वास्तव्या नद्यां स्नायात्तदिच्छया ॥१२.२.२५॥
न दूरस्थां नदीं गच्छेन्न वेदं शृणुयाद्वधूः ।
नत्येक्षराणि गृह्णीयात् गीतं नृत्तञ्च वर्जयेत् ॥१२.२.२६॥
नान्यं पुमांसमीक्षेत साद्ध्वी गुप्तैव निस्सरेत् ।
विना दासीं न निर्गच्छेदच्छत्रा च कदाचन ॥१२.२.२७॥
न रात्रौ सर्वथा गच्छेन्नोत्सवे देवमन्दिरं ।
इत्थं सङ्क्षेपतः प्रोक्ताः स्त्रीणां धर्म्मा बृहत्तमाः ॥१२.२.२८॥
यान् कार्त्स्न्येन समास्थायस्त्रीयो यान्ति परां गतिं
इति द्वादशस्याध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः
अहन्येव बहिर्गच्छेद्यतवाग्रजसि स्रुते ।
अवर्ज्यस्पर्शनादन्यदस्पृष्ट्वैव गृहाद्वधूः ॥१२.३.१॥
न स्पृशेच्च गृहं क्वापि पश्चात् स्वस्थानमाश्रयेत् ।
न दन्तधावनं कुर्यान्नाभ्यङ्गं नाञ्जनं दृशोः ॥१२.३.२॥
न कुर्यात् कस्यचित् स्पर्शमात्मोपकरणाद्विना ।
स्वसन्तानाद्विनाप्येषा स्तन्यपानोपजीवनात् ॥१२.३.३॥
तृतीयेहनि न स्नानमुदक्याया विधीयते ।
प्राप्तौ तूपवसेत्तत्र स्नात्वाकार्यस्य कर्म्मणः ॥१२.३.४॥

सन्ध्यायां न बहिस्तिष्ठेद्दीर्घं वर्त्म न लङ्घयेत् ।
अनाहतं न बिभृयाद्वासो माल्यं न धारयेत् ॥१२.३.५॥
न कांस्यभाजनेश्नीयात् पर्णभुक् ब्रह्मचारिणी ।
न्यवसेत् भूमिशय्यां च दिवास्वापं परित्यजेत् ॥१२.३.६॥
यदि माल्यं बिभर्त्येषा खलतिर्ज्जायते सुतः ।
सुता वाञ्जनमक्ष्णोश्चेज्जात्यन्धावुदितौ च तौ ॥१२.३.७॥
तौ तु श्वित्रयुतौ लिम्पत्यङ्गानि यदि पुष्पिणी ।
करोति यदि साभ्यङ्गं तौ जायेतां हतप्रभौ ॥१२.३.८॥
करोति यदि तूदक्या दन्तधावनमाप्लवात् ।
प्राग्जायते ततःश्यावदन्तौ तौ दन्तरोगिणौ ॥१२.३.९॥
यद्वोच्चावचदन्तौ च सन्ध्यायां चेत् बहिःस्थितिं ।
भजतोपस्मृतिग्रस्तौ लङ्घयत्ययनं यदि ॥१२.३.१०॥
खञ्जावनाहतं वासो बिभर्ति यदि कुष्ठिनौ ।
अश्नाति कांस्यपात्रे चेत् भिक्षाचार्योपजीविनौ ॥१२.३.११॥
ब्रह्मवर्च्चससंयुक्तौ पर्णभुग्यदि पुष्पिणी ।
अथ पर्णभुगप्येषा पालाशं परिवर्जयेत् ॥१२.३.१२॥
पत्रं पिप्पलसम्भूतं नैयग्रोधमथापि वा ।
चतुर्थेहनि तु स्नायादादित्योदयतः परं ॥१२.३.१३॥
स्नानाम्बरं वसानैव दत्तं रजकयोषिता ।
निवृत्तवृषलीकर्म्मा सुस्नाता च द्विजाङ्गना ॥१२.३.१४॥
नित्यकर्म्मणि संशुद्धिं लभते नात्र संशयः ।
अथाद्विजमहेला चेत् सुस्नानेनैव शुद्ध्यति ॥१२.३.१५॥
द्विजाभासवधूटीनां द्विजस्त्रीवच्च दृश्यते ।
स्नाने प्रायश आचारस्तमेवात्र प्रमाणयेत् ॥१२.३.१६॥
सर्वा स्नाता चतुर्थेह्नि स्पर्शयोग्या यथाविधि ।
माहानसिककृत्ये च कुलस्त्री विहिताप्लवा ॥१२.३.१७॥
भर्तुरेव मुखं पश्येदृतुस्नातागताङ्गना ।
अनिच्छयापि वीक्षेत नान्यस्य वदनं सती ॥१२.३.१८॥
एते रजस्वलाधर्म्मा भार्गवेण निदर्शिताः ।
प्रधानाः कथितास्सर्वे नोक्ता विस्तरतो भयात् ॥१२.३.१९॥
इति द्वादशस्यायध्याययस्य तृतीयः पादः

अथ चतुर्थः पादः
अथातोनुप्रवक्ष्यामि नृणां केरलवासिनां ।
अनाचारान् समासेन भार्गवेण प्रदर्शितान् ॥१२.४.१॥
अन्यत्राचरणाभावादनाचारान् भृगूद्वहः ।
यानाचष्ट चतुःषष्टिमाख्यास्ये तत्र तानपि ॥१२.४.२॥

वर्जयेद्दन्तकाष्ठानित्यस्नाने सचेलतां ।
स्नानवस्त्रेणाङ्गमार्ष्टिं सन्ध्याप्राङ्ज्जनं तथा ॥ १२.४.३॥
पचनादिकमस्नात्वा चैकरात्रोषितं जलं ।
स्नानादौ फलसङ्कल्पं पात्रोच्छिष्टस्थितोदकं ॥ १२.४.४॥
शूद्रादिस्पर्शने स्नानं कुर्युश्शुद्धिमभीप्सवः ।
अन्त्यजानां सन्निकर्षे चापि मज्जनमाचरेत् ॥ १२.४.५॥
स्पर्शने चान्त्यजस्पृष्टकूपवापीस्थवारिणः ।
सम्मार्ज्जितक्षितौ पादन्यासे च प्रोक्षणादृते ॥ १२.४.६॥
ऊद्ध्र्वपुण्ड्रे त्रिपुण्ड्रं च कुर्याच्छुद्धेन भस्मना ।
सर्वेषां कर्म्मणां मन्त्रं स्वयमेवोच्चरेद्द्विजः ॥ १२.४.७॥
अन्नं पर्युषितं प्रायो व्यञ्जनञ्च तथाविधं ।
शिशूच्छिष्टञ्च नैवेद्यं शिवस्य च विवर्जयेत् ॥ १२.४.८॥
हस्तदत्तं घृतं शाकं विना दर्व्या न भक्षयेत् ।
महिषीघृतदुग्द्धादि हव्ये कव्येपि च त्यजेत् ॥ १२.४.९॥
भुञ्जीत कबलीकृत्य नोच्छिष्टञ्च यथा भवेत् ।
अशुचिर्न्नैव ताम्बूलभक्षणादिकमाचरेत् ॥ १२.४.१०॥
ब्रह्मचर्याश्रमे निष्ठां व्रतानां करणं तथा ।
दक्षिणां च गुरोः कुर्याद्वीथ्यामध्ययनन्तु न ॥ १२.४.११॥
क्रियाः षोडश कुर्वीत यथाकालं यथाविधि ।
कन्याविक्रयणं नैव कुर्यात् काम्यव्रतानि च ॥ १२.४.१२॥
रजस्वलायाः स्पर्शे तु स्त्रियः स्नात्वैव भोजनं ।
तन्तुवायस्य रजकस्यापि कर्म्म विवर्जयेत् ॥ १२.४.१३॥
क्षत्रादीनां न कर्तव्यं रुद्राक्षादौ शिवार्च्चनं ।
ब्राह्मणो नैव कुर्वीत शूद्रश्राद्धप्रतिग्रहं ॥ १२.४.१४॥
कुर्यात् पितामहश्राद्धं श्राद्धं मातामहस्य च ।
तल्पत्न्योरपि दर्शे च श्राद्धं विधिवदाचरेत् ॥ १२.४.१५॥
पित्रोस्संवत्सरस्यान्ते सपिण्डीकरणं तथा ।
तावद्दीक्षा च कर्तव्या श्राद्धमृक्षप्रमाणतः ॥ १२.४.१६॥
अन्यस्य पुत्रतां यातः स्वपित्रोः श्राद्धमाचरेत् ।
स्वभूमौ शवदाहस्तु कर्तव्यो नेतरत्र तु ॥ १२.४.१७॥
स्त्रीदर्शनं न कर्तव्यं सन्यासाश्रमवर्तिभिः ।
मृतेषु तेषु न श्राद्धं कुर्यादुद्दिश्य तान् क्वचित् ॥ १२.४.१८॥
विप्रस्त्रियो न द्रष्टव्याः पुम्भिरन्यैः पतिं विना ।
गृहात् बहिर्न्न गन्तव्यं ताभिर्द्दासीं विना क्वचित् ॥ १२.४.१९॥
वस्त्रं श्वेतेतरं तस्या नासावेधश्च नेष्यते ।
सुरापानानन्यविप्रस्त्रीसङ्गमाद्यैः पतेद्द्विजः ॥ १२.४.२०॥

देवालयेषु प्रेतानां प्रतिष्ठां नैव कारयेत् ।
शूद्रादिस्पर्शनं देवप्रतिमासु विवर्जयेत् ॥ १२.४.२१॥
निवेदितान्नमन्यस्मै देवाय न निवेदयेत् ।
अहविष्यञ्च देवानां विवाहादि न कारयेत् ॥ १२.४.२२॥
आशीर्वादो न कर्तव्यो नमस्कारञ्च भूसुरैः ।
वार्षिकी पशुहिंसा तु न कार्या मोक्षकामिभिः ॥ १२.४.२३॥
शैववैष्णवतन्त्रोक्तमतादन्यत्तु वर्जयेत् ।
एकयज्ञोपवीति स्याज्ज्येष्ठभ्राता गृही भवेत् ॥ १२.४.२४॥
कुर्युः क्षत्रादयः श्राद्धं मातुलस्य यथाविधि ।
दायादा भागिनेयाः स्युस्तेषां नैव तु सूनवः ॥ १२.४.२५॥
अब्राह्मणो न सन्यासं कुर्यात् पत्यौ मृते वधूः ।
नैव कुर्यात्सहमृतिं पातिव्रत्येपि निश्चिते ॥ १२.४.२६॥
एतावन्तो ह्यनाचाराः प्राधान्यपरिचिन्तया ।
भार्गवेण समामानाता ये चान्ये किञ्चिदूनतां ॥ १२.४.२७॥
भजन्तस्ते न चाख्याताऽशतञ्चैव सहस्रकं ।
औद्ध्र्वदैहिककर्म्माणि शावाशौचञ्च सूतकं ॥ १२.४.२८॥
प्रकीर्णसङ्ग्रहञ्चात आख्यास्ये भाग उत्तरे
इति शाङ्करे धर्मशास्त्रे लघुधर्मप्रकाशिकायां
द्वादशस्याध्यायस्य चतुर्थः पादः
द्वादशाध्यायः समाप्तः ॥ १२॥
पूर्वभागः सम्पूर्णः ।
ॐ तत्सत् ब्रह्मार्पणमस्तु ।
समर्पणं
समर्प्यते सकलचराचरानते
महत्तरे मुनिजनहृत् सुशोभिते ।
पदाम्बुजे परमशिवस्य शैलजा-
विलोचनभ्रमरकिशोरनन्दिते ॥

Encoded and proofread by S. Madhavan Namboothiri smnamboothiri at gmail.com

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2016
http://sanskritdocuments.org